दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् आश्विन् शुक्लपञ्चमी
आश्विन् 29 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-356 | 1 | अक्तूबर 15, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 भारत-कनाडा देशयोः रणनीतिक-सहभागितायाः नूतनः अभ्युदयः, वाणिज्य-ऊर्जा-रक्षा-शिक्षा-क्षेत्रेषु परस्पर-सहयोगस्य दृढीकरणाय सङ्कल्पः

4 हिमाचलप्रदेशस्य सर्वकारीयचिकित्सालयेषु कर्मचारिणाम् अभावस्य निवारणं भविष्यति, यत्र ३१ दिसम्बर यावत् ९०% पदानि पूरयितुं लक्ष्यम्

9 केन्द्रीयसंस्कृत-विश्व-विद्यालयस्य कुलसचिवपदे प्रो. आर्. जी. मुरली-कृष्णेन कार्यभारः स्वीकृतः

केन्द्रीय-मन्त्रिमण्डलेन रेल-कर्मचारिभ्यः अष्टसप्ततिः दिनानाम् पारितोषिकं अनुमोदितम्



उत्कृष्ट-प्रदर्शनाय चत्वारिंशत-सहस्रोत्तर-एकादश लक्ष-रेल-कर्मचारिणः अष्टसप्ततिः दिनानां वेतनतुल्यं उत्पादकता-सम्बद्ध-पारितोषिकं लप्स्यन्ते। मन्त्रिमण्डलस्य निर्णयं श्रावयता अश्विनी-वैष्णवेन प्रोक्तम् यत् पर्वणः प्राक् दीयमानं एतत् पारितोषिकं कर्मचारिणां कार्य-प्रेरणाम् उत्कर्षयिष्यति। केन्द्रीय-मन्त्रिमण्डलेन 'राष्ट्रिय-सामाजिक-सहायता-कार्यक्रमः' च एकत्रिंशदुत्तरद्विसह-स्रतमवर्ष-पर्यन्तं विस्तारितः । केन्द्रीय-मन्त्रिमण्डलेन 'राष्ट्रिय-सामाजिक-सहायता-कार्यक्रमस्य' आगामी-पञ्च-वर्षाणां कृते अष्टविंशत्युत्तर चतुः शतोत्तर त्रिपंचाशत् कोटि-रुप्यकाणां व्ययेन विस्तारः स्वीकृतः। अनेन दिव्यांगजन-पेंशन-राशिः वर्धिता, दिव्यांगतायाः मानदण्ड-सीमा अशीतिप्रतिशततः न्यूनीकृत्य चत्वारिंशत् प्रतिशतं विहिता, तथा हि न्यूनतम वयः-सीमा 'जन्मतः एव' निर्धारिता इति सूचना-मन्त्रिणा अश्विनी-वैष्णवेन समाख्यातम्।

अद्यतनीयं सुभाषितम्

अस्ति जलं जलराशौ क्षारं तत्किं विधीयते तेन।
लघुरपि वरं स कूपो यत्राकण्ठं जनः पिबति।।

भावार्थः- यदि किसी बड़ी जलराशि (जलाशय या समुद्र) का जल खारा (पीने के लिये अयोग्य) हो तो उसका क्या लाभ? इस से अच्छा तो वह छोटा सा कुंआ है जिसका स्वादिष्ट जल लोग कंठ तक भर कर पीते हैं।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

वित्तीयक्षेत्रे मन्त्रिमण्डलस्य ऐतिहासिकः निर्णयः

केन्द्रीय-मन्त्रिमण्डलस्य महती स्वीकृतिः। 'आई.डी.बी.आई. बैंक' संस्थायाः रणनीतिक-पुनर्संरचना निर्णीता। मन्त्रिमण्डलस्य उपवेशनान्तरं नवदेहल्यां वार्ताहरान् सम्बोधयन् सूचना-प्रसारण-मन्त्रिणा अश्विनी-वैष्णवेन समाख्यातम् यत् देशस्य सूक्ष्म-लघु-मध्यम-उद्यमानां तथा नूतन-औद्योगिक-उपक्रमाणां समभ्युदये अस्याः संस्थायाः महती भूमिका वर्तते। मन्त्रिणा निगदितं यत् बैंक-संस्थानस्य समृद्धये रणनीतिक-सहयोगी चयनितः अस्ति, यस्य साहाय्येन अस्यां संस्थायाम् अभिनव-मूलधनस्य प्रवाहः विधास्यते। अश्विनी वैष्णवेन एतदपि स्पष्टीकृतम् यत् पुनर्संरचितायां संस्थायां भारत-सर्वकारः भारतीय-जीवन-बीमा निगमः च उभौ मिलित्वा चतुस्त्रिंशत् प्रतिशतं स्वामित्वांशं स्व-समीपे एव रक्षिष्यतः।

भारतेन अष्टात्रिंशत् विकसित-राष्ट्रैः सह प्राधान्य-व्यापार-सन्धयः साधिताः - पीयूष गोयलः



वाणिज्य-तथा-उद्योग-मन्त्रिणा पीयूष गोयलेन समाख्यातम् यत् भारतेन गतेषु चतुर्षु वर्षेषु अष्टात्रिंशत् विकसित-राष्ट्रैः सह प्राधान्य-व्यापार-संधयः साधिताः । नवदेहल्याम् आयोजितस्य 'ब्लूमबर्ग-न्यू-इकॉनमी फोरम्' इत्याख्यस्य मञ्चस्य उपवेशने भाषमाणः श्रीगोयलः अवदत् यत् वैश्विक सहयोगिभ्यः स्व-विपणनानि उद्घाटयन् एव भारत-देशः भारतीय-उद्यमानां कृतेऽपि विपणि-प्रवेशस्य व्यापकं विस्तारं विधातुं कटिबद्धः अस्ति।

जागतिक-ज्ञान-सांस्कृतिक-आदान-प्रदानेषु भारतस्य ऐतिहासिकम् अवदानम् प्रधानमन्त्रिणा नरेन्द्र-मोदिना सप्रश्रयं समुद्घोषितम्



प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिपादितं यत् देशस्य सभ्यता-यात्रा शतकानां सांस्कृतिक-विनिमयेन ज्ञान-सहभाजनस्य च परम्परया निरूपिता वर्तते। विश्वे भारतस्य सांस्कृतिक-सम्पर्कानाम् उपरि आयोजितायाः अन्ताराष्ट्रिय सङ्गोष्ठ्याः उद्घाटन सत्रे प्रेषिते सन्देशे प्रधानमन्त्री अवोचत् यत् नालन्दा-सदृशैः प्राचीन-ज्ञान-केन्द्रैः भारतस्य एशिया-महाद्वीपस्य च अन्य-भागानां मध्ये ज्ञान-विनिमयः सुदृढः जातः। तेन विशेषतया प्रतिपादितं यत् संन्यासिनः, विद्वांसः, वणिजः, पर्यटकाश्च स्थल-जल-मार्गैः भारतीय-विचारान्, दर्शनं च सम्पूर्णे विश्वे प्रसृतवन्तः। प्रधानमन्त्रिणः अयं सन्देशः संस्कृति-सचिवेन विवेक-अग्रवालेन सम्मेलने पठितः ।

भीम-अनुप्रयोगे तत्क्षण-राष्ट्रीयनिवृत्तिवेतन-व्यवस्थायाः (एनपीएस) सौविध्यस्य प्रारम्भः

निवृत्तिवेतन-निधि-नियामक-विकास-प्राधिकरणेन तथा च भारतीय-राष्ट्रीय-भुगतान-निगमस्य भीम-सेवा-सीमित-संस्थया मिलित्वा भीम-भुगतान-अनुप्रयोगे तत्क्षण-राष्ट्रीयनिवृत्तिवेतन-व्यवस्थायाः सौविध्यं प्रारब्धम्। अनेन अभिनव-सौविध्येन योग्याः नागरिकाः पूर्वसिद्धायाः वित्तकोश-प्रमाणितायाः ग्राहक-परिचय-प्रक्रियायाः तथा च एकीकृत-भुगतान-अन्तर्फलकस्य उपयोगाय केवलं त्रिषु चरणेषु राष्ट्रीयनिवृत्तिवेतन-व्यवस्थायाः लेखां उद्घाटयितुं शक्नुवन्ति। अस्य सौविध्यस्य कारणेन वित्तकोश-शाखागमनस्य अथवा पुनः नूतनतया पत्रलेखन-प्रक्रियायाः आवश्यकता न भविष्यति। एषा सेवा वर्तमाने भारतीय-स्टेट-वित्तकोशः, एचडीएफसी-वित्तकोशः, आईसीआईसीआई-वित्तकोशः, एक्सिस-वित्तकोशः, इण्डसइण्ड-वित्तकोशः तथा च बड़ौदा-वित्तकोशः इत्येतेषां ग्राहकेभ्यः उपलब्धा अस्ति। अचिरात् एव अन्यान् वित्तकोशान् अपि अत्र योजयिष्यते। अष्टादशतः पञ्चाशीति-वर्षपर्यन्तवयस्काः भारतीय-नागरिकाः न्यूनतमेन सार्धद्विशत-(२५०)रूप्यकाणां प्रारम्भावस्थायाः योगदानेन सह लेखां उद्घाटयितुं शक्नुवन्ति।

भारत-कनाडा-देशयोः रणनीतिक-सहभागितायाः नूतनः अभ्युदयः, वाणिज्य-ऊर्जा-रक्षा-शिक्षा-क्षेत्रेषु परस्पर-सहयोगस्य दृढीकरणाय सङ्कल्पः



भारत-कनाडा-देशयोः मध्ये व्यापक-आर्थिक-सहभागिता-संधिं लक्ष्यीकृत्य सम्भाषणानि त्वरित-गतिं प्राप्तानि। ओटावा-नगरे निर्वृत्तात् पञ्चम-चक्र-विचार-विमर्शानन्तरं, षविंशत्युत्तरद्विसहस्रतम खिष्टाब्दस्य पर्यन्तम् अस्य आर्थिक-सन्धेः निष्पादनं सम्भाव्यते। अनेन द्वयोः राष्ट्रयोः द्विपक्षीय-वाणिज्य-निवेशयोः सुदृढता अभ्युदेष्यति। विदेशमन्त्री डा.एस.जयशङ्करः अथ च कनाडादेशस्य विदेशमन्त्री अनिता-आनन्दः व्यापार-निवेश-शिक्षणोर्जा-रक्षा-जनात्-जन-सम्पर्कक्षेत्रेषु भारत-कनाडा-सम्बन्धानां प्रगतेः समग्र-समीक्षां कृतवन्तौ । उभयोः विदेशमन्त्रिणोः मध्ये नवदेहल्यां द्विपक्षीयवार्ता सम्पन्ना। सामाजिक-सञ्चारपटले डा. जयशङ्करेण संसूचितं यत् वार्ताकाले प्रमुख-क्षेत्रीय-वैश्विक-विषयेषु अपि उभयपक्षीय-विचार-विनिमयो जातः । सः अवोचत् यत् दृढ-नेतृत्वस्य शासनोद्योगयोः च सततााभिसन्धानस्य बलेन भारत-कनाडा-देशौ रणनीतिक-सहभागितां नूतनामुन्नतिं नयतः। अपरत्र कनाडा-देशस्य विदेशमन्त्रिणा अनिता-आनन्देन प्रतिपादितं यत् भारत-कनाडा सम्बन्धेषु साम्प्रतिकी प्रगतिः अतीवोत्साहवर्धिका वर्तते, यत्र व्यापार-वार्ताभ्यः आरभ्य ऊर्जा-नवाचार-सुरक्षा-क्षेत्रेषु सहयोगस्य महती वृद्धिः सञ्जाता। सामाजिक-सञ्चारपटले सा न्यरूपयत् यत् अस्य द्विपक्षीय-सम्बन्धस्य वास्तविकं महत्त्वं तयोः उपलब्धिषु निहितम् अस्ति याः उभौ देशौ मिलित्वा सम्पादयितुं शक्नुतः। सा अग्रे अवदत् यत् यदा अन्ताराष्ट्रिय-व्यवस्थायाम् आधारभूत-परिवर्तनानि जायमानानि सन्ति, तस्मिन् काले भारत-कनाडा-देशयोः निकट-सम्पर्कः भविष्यस्य समृद्धेः स्वरूप-निर्धारणाय अथ च उन्मुक्त-स्थिर-समृद्ध-हिन्द-प्रशान्त-क्षेत्राय सकारात्मक-योगदानं दातुम् एकम् उत्तमम् अवसरं प्रददाति।

सी.जे.पी इत्यस्य दलस्य नेतारौ सौरभ-दास तथा आशुतोष-रङ्क इत्येतौ पञ्च-दिवसीयस्य न्यायिक-कारावासे प्रेषितवन्तौ



देहल्याः विशेष-कार्यपालक दण्डाधिकारी-न्यायालयः सी.जे.पी इत्यस्य दलस्य नेतारौ सौरभ-दास तथा आशुतोष-रङ्का इत्येतौ पञ्च-दिवसीयस्य न्यायिक कारावासे प्रेषितवान्, यदा च अन्यः नेता अजिङ्क्य-शिंदे वैयक्तिक-प्रत्याभूति-पत्रेण विमुक्तः। जन्तर-मन्तर-स्थलस्य विरोध-प्रदर्शन-स्थानत्वेन निषेधानन्तरदिने तत्र प्रवेष्टुं प्रयतमानानाम् आरोपेण देहली-आरक्षकाधिकारिभिः त्रयोऽपि नेतारः निगडिताः।

नवदेहल्यां भारत-आसियान-रक्षा-चिन्तक-मञ्चः सम्बोधितवान् रक्षामन्त्री

हिमसंस्कृतवार्ता नवदेहली।

रक्षामन्त्रिणा राजनाथसिंहेन प्रतिपादितं यत् शान्तिपूर्णस्य, स्थिरस्य, उन्मुक्तस्य च हिन्द-प्रशान्त-क्षेत्रस्य निर्माणे भारतस्य आसियान-सङ्गटनस्य च गभीरा रुचिः वर्तते । नवदेहल्यां भारत-आसियान-रक्षा-चिन्तक-मञ्चः सम्बोधयता श्रीसिंहेन स्पष्टीकृतं यत् भारतस्य हिन्द-प्रशान्त-दृष्टिकोणे आसियान-सङ्गटनं केन्द्रीय महत्त्वं भजते, अथ च भारतस्य एक्ट-ईस्ट-नीतिः दक्षिण-पूर्व-एशिया-देशैः सह सहभागित्वेन कार्यं कर्तुं दीर्घकालिकी प्रतिबद्धता वर्तते। मञ्चस्य कृते व्यावहारिक-पदक्षेपाणां रूपरेखां प्रस्तुवन् रक्षामन्त्री समुद्री-सुरक्षा, आपत्प्रबन्धनम् सायबर-सङ्कटानि अथ उदीयमान प्रौद्योगिकी-विषयेषु केन्द्रितं भारत-आसियान-संयुक्त-अनुसन्धान-कार्यविवरणं विकसितुं प्रस्तावम् उपस्थापितवान्। षड्विंशत्यधिक-द्विसहस्रतमस्य वर्षस्य भारत-आसियान-समुद्री-सहयोग-वर्षरूपेण निर्देशं कुर्वन् सः समुद्री-क्षेत्र-जागरुकतायाः दृढीकरणाय, सूचना-आदान-प्रदानस्य परिष्काराय अथ च आपत्कालीन स्थितिषु, समुद्री-दस्युतायां अवैध-मत्स्य-ग्रहण-कार्याणाम् निवारणाय सामूहिक क्षमता-निर्माणाय आह्वानम् अकरोत्।

राष्ट्रपतिः मुर्मू विजयवाडायाः श्रीदुर्गामल्लेश्वरस्वामि-मन्दिरे देव्यै कनकदुर्गायै पूजां समर्पितवती

राष्ट्रपतिः द्रौपदी मुर्मू अद्य विजयवाटिकायाः श्रीदुर्गामल्लेश्वरस्वामि-मन्दिरे भगवत्याः कनकदुर्गायाः पूजार्चनं कृतवती।इतः पूर्वं राष्ट्रपतिमहोदया विशेषविमानेन गन्नवरम्-विमानपत्तने समुपस्थिता। राज्यपालः न्यायाधिपतिः एस्. अब्दुल-नज़ीरः, केन्द्रीय-मन्त्रिणौ कमलेशपासवानः पेम्मासानी-चन्द्रशेखरः च, तथा च बहवः राज्यमन्त्रिणः विमानपत्तने तस्याः स्वागतम् अकुर्वन्। तदनन्तरं सा भूमार्गेण (रथ्यामार्गेण) मन्दिरं प्रति प्रस्थिता। आन्ध्रप्रदेशस्य स्वकीयस्य द्वैदिवसीयस्य प्रवासस्य समये राष्ट्रपतिमहोदया अद्य विजयवाटिकायां 'राष्ट्रिय-सरस्-मेला २०२६' इत्यस्य उद्घाटनं करिष्यति।

प्रधानमन्त्री एशियाई-क्रीडा-स्पर्धासु भागं गृहीतवता भारतीय-क्रीडकदलेन सह संवादं करिष्यति



प्रधानमन्त्री नरेन्द्रमोदी नवदेहल्यां षड्विंशत्यधिक-द्विसहस्रतमवर्षस्य एशियाई-क्रीडा-स्पर्धासु भागं गृहीतवता भारतीय-क्रीडकदलेन सह संवादं करिष्यति। अवसरेऽस्मिन् प्रधानमन्त्री उपस्थित-क्रीडकानपि सम्बोधयिष्यति। जपान-देशस्य आइची-नागोया-नगरे सम्पन्नासु एशियाई-क्रीडासु भारतेन एकविंशति-स्वर्णपदकानि, सप्तविंशति-रजतपदकानि, अथ च सप्तत्रिंशत-कांस्यपदकानि समेत्य पञ्चाशीति-पदकानि विजित्य पदकतालिकायां चतुर्थं स्थानं प्राप्तम्। एशियाई-क्रीडासु शीर्ष-पञ्चदेशेषु भारतस्य इदं द्वितीयं निरन्तरं स्थानम् अस्ति । एतत् तावत् विविध-क्रीडा-विधासु देशस्य वर्धमानं प्रतिस्पर्धा-सामर्थ्यं स्पष्टतया प्रदर्शयति ।

अंशविपणिसमाचारः भारतीयांशविपण्यां ह्रासः, सेन्सेक्स- निफ्टी-सूचकाङ्क्योः पतनम्

हिमसंस्कृतवार्ताः- डॉ. विमलेशझा, मुम्बई, दिनाङ्कः १४/१०/२०२६ बुधवासरे भारतीयांशविपण्यां न्यूनता दृश्यते स्म। मुम्बईनगरे बीएसईसेन्सेक्ससूचकाङ्कः २५१ अङ्कैः पतित्वा ७२,७८१ इत्यस्मिन् स्तरे समाप्तः जातः। तत्रैव एनएसईनिफ्टी-५०-सूचकाङ्कः ९९ अङ्कैः न्यूनतां प्राप्य २२,६२२ इत्यस्मिन् स्तरे समाप्तो अभवत्। मूल्यवृद्धिसम्बद्धाभिः चिन्ताभिः विपण्यां विद्यमानस्य भारस्य च प्रभावेण अद्य अंशविपण्यां न्यूनता अभवत्। निवेशकानां सावधानतायाः कारणेन अपि विपण्यां विक्रयभारः दृष्टः। अद्य बजाजफिनसर्व, बजाजफाइनेन्स, महिन्द्रा एण्ड महिन्द्रा तथा इण्डिगो इत्येतेषां प्रमुखसंस्थानानाम् अंशमूल्येषु न्यूनता अभवत्। एतेषां संस्थानानाम् अंशमूल्यानि १.५० प्रतिशततः २.५५ प्रतिशतपर्यन्तं न्यूनतां प्राप्तानि।वर्तमानपरिस्थितौ निवेशकैः विपण्याः उत्थानपतनयोः, प्रमुखसंस्थानानां वित्तीयपरिणामानां, मूल्यवृद्धिः तथा वैश्विकार्थिक-परिस्थितीनां च सूक्ष्मतया निरीक्षणं करणीयम्। निवेशसम्बद्धेषु निर्णयेषु सावधानता विवेकश्च अत्यावश्यकौ स्तः। समग्रतया वयं वक्तुं शक्नुमो यत् अद्य भारतीयांशविपण्यां न्यूनता दृश्यते स्म। सेन्सेक्सनिफ्टीसूचकाङ्क्योः पतनं निवेशकानां मनोभावेषु विद्यमानम् अनिश्चितत्वं सूचयति। अतः निवेशकैः परिस्थितेः सम्यग् विश्लेषणं कृत्वा एव निवेशसम्बद्धाः निर्णयाः करणीयाः।

रक्षामन्त्री राजनाथसिंहः रक्षाक्षेत्रे विभिन्नानां संस्थानां मध्ये घनिष्ठसहयोगस्य आह्वानम् अकरोत्



रक्षामन्त्री राजनाथसिंहः तीव्रगत्या परिवर्तमानस्य युद्धस्वरूपस्य मध्ये रक्षाबलानां, रक्षा-अनुसन्धान-विकास-सङ्गठनस्य, शैक्षणिक-संस्थानां, रक्षा-सार्वजनिक-क्षेत्र-उपक्रमाणां तथा च निजी-उद्योगस्य मध्ये दृढ-सहयोगस्य आह्वानम् अकरोत्। एतेषु देशज-प्रौद्योगिकीनां विकासाय, तासां स्वीकरणाय, निरन्तर-संवर्धनाय च नवोद्यमानां प्रोत्साहनम् अन्तर्भवति। रक्षामन्त्री नवदेहल्यां भारतीय-प्रौद्योगिकी-संस्थान-कानपुरस्य 'अस्मत्तः महत्तरम्' इति धनसङ्ग्रह-अभियानस्य प्रारम्भावसरे इदम् अवदत्। सिंहमहोदयः दृढतया अवदत् यत् देशज-प्राविधिक-क्षमतानां सुदृढीकरणं रणनीतिकदृष्ट्या महत्त्वपूर्णम् अस्ति, यतो हि कृत्रिम-बुद्धिमत्ता, स्वायत्त-प्रणाल्यः, मानव-रहित-मञ्चाः, उन्नत-संवेदकाः, जाल-सुरक्षा तथा च अन्तरिक्ष-आधारित-प्रौद्योगिक्यः सैन्य-गतिशीलतां नूतनं रूपं प्रयच्छन्ति। सः राष्ट्रिय-सुरक्षायाः प्राविधिक-क्षमतायाः च मध्ये वर्धमानस्य परस्पर-सम्बन्धस्य उल्लेखम् अकरोत्। सः अस्मिन् विषये बलं दत्तवान् यत् भारतीय-प्रौद्योगिकी-संस्थानानि शैक्षणिक-अनुसन्धानं रक्षा-सञ्चालन-आवश्यकताभिः उद्योगस्य आवश्यकताभिः च सह संयोज्य महत्त्वपूर्णं योगदानं कर्तुं शक्नुवन्ति। सः विकसित-भारतस्य सङ्कल्पनां साक्षात्कर्तुम् उच्चशिक्षायाः अनुसन्धानस्य च सशक्त-संस्थानां महत्त्वम् अपि उल्लिखितवान्।रक्षामन्त्री अकथयत् यत् शासनेन षट्सहस्राधिक-नवोद्यमैः, षट्पञ्चाशत्-अतिवृद्धिशील-उद्यमैः, प्रायः पञ्चसहस्र-स्वाम्य-अधिकारैः (पेटेण्ट्-अधिकारैः) च सह पर्यावरण-तन्त्रं सुदृढं कर्तुं निरन्तरं प्रयासाः कृताः। सः अवदत् यत् एताः सिद्धयः प्रदर्शयन्ति यत् भारतीय-प्रौद्योगिकी-संस्थानानि केवलं ज्ञानप्रदानकर्तृ-संस्थानानि न सन्ति, अपि तु नवोन्मेषस्य, उद्यमस्य, प्राविधिक-क्षमतायाः च मुख्य-चालक-रूपेण वेगेन उद्भवन्ति। भारतीय-प्रौद्योगिकी-संस्थान-कानपुरस्य रक्षा-अनुसन्धान-उद्योग-शैक्षणिक-उत्कृष्टता-केन्द्रस्य विषये वदन् सिंहमहोदयः अकथयत् यत् एतादृशाः सहभागाः वैज्ञानिक-प्रतिभां, संस्थागत-विशेषज्ञतां, रक्षाबलानां च सञ्चालन-अनुभवम् एकत्र आनयिष्यन्ति, येन रणनीतिक-महत्त्वस्य देशज-प्रौद्योगिकीनां विकासः भवेत्। रक्षामन्त्री अवदत् यत् विश्वसनीयाः शैक्षणिक-संस्थाः अनुसन्धानं व्यावहारिक-रक्षा-प्रयोगेषु परिवर्तयितुं सेनायाः विकसमानाः प्राविधिक-आवश्यकताः पूरयितुं च महत्त्वपूर्णां भूमिकां निर्वोढुं शक्नुवन्ति। सः अकथयत् यत् इयं संस्था वैज्ञानिक-अनुसन्धानस्य औद्योगिक-प्रयोगस्य च, तथा च उदीयमान-प्रौद्योगिकीनाम् उद्यमस्य च मध्ये सेतोः कार्यं कर्तुं शक्नोति। अनुसन्धाने नवोन्मेषे च निरन्तर-निवेशस्य आवश्यकतां प्रतिपादयन् रक्षामन्त्री अनुसन्धाने उन्नत-प्रौद्योगिकीषु च निजी-क्षेत्रस्य निवेशं प्रवर्धयितुम् अनुसन्धान-विकास-नवोन्मेष-योजनायै शासनेन स्वीकृतानाम् एकलक्षकोटि-रूप्यकाणाम् उल्लेखम् अकरोत्। सिंहमहोदयः विश्वासं प्राकटयत् यत् इदम् अभियानं दृढ-अनुसन्धान-क्षमतानां, समुन्नत-सुविधानां, प्रतिभाशाली-छात्राणां कृते अवसराणां तथा च राष्ट्रिय-वैश्विक-आव्हानानां समाधाने सहायकं भविष्यति। 'अस्मत्तः महत्तरम्' इति अभियानेन, भारतीय-प्रौद्योगिकी-संस्थान-कानपुरस्य लक्ष्यं २०२९ वर्षस्य मार्च-मासपर्यन्तम् एक-शङ्कु (एक-अर्बुद)-डालर-परिमितस्य धनस्य सङ्ग्रहणं वर्तते, यत् कस्यापि भारतीय-प्रौद्योगिकी-संस्थानस्य द्वारा सञ्चालितम् अद्यपर्यन्तस्य बृहत्तमं धनसङ्ग्रह-अभियानम् अस्ति। रक्षा-मन्त्रालयेन कथितं यत् अस्य उद्देश्यं भारतीय-प्रौद्योगिकी-संस्थान-कानपुरस्य अनुसन्धान-संरचनां सुदृढीकर्तुं, प्रतिभानां संवर्धनं कर्तुं तथा च देशज-प्रौद्योगिकीनां नवोन्मेषाणां च विकासे बाणिज्यीकरणे च तीव्रताम् आनेतुं वर्तते, येन २०४७ पर्यन्तं भारतस्य विकसित-राष्ट्र-निर्माणस्य लक्ष्यं साकारं भवेत्।

पूर्वराष्ट्रपतिना रामनाथ-कोविन्देन उत्तरप्रदेशे विकासस्य सुशासनस्य च प्रयासानां प्रशंसा कृता



पूर्वराष्ट्रपतिना रामनाथकोविन्देन मुख्यमन्त्रिणः योगादित्यनाथस्य नेतृत्वे उत्तरभारते (उत्तरप्रदेशराज्ये) विकास-विधि-व्यवस्था-सुशासनानां क्षेत्रेषु कृतानां प्रयासानां भूरिशः प्रशंसा कृता। पूर्वराष्ट्रपतिः लखनऊनगरे आयोजिते एकस्मिन् उत्सवे स्वस्य आत्मचरितस्य 'भारतीयगणतन्त्रस्य विजयगाथा, मम जीवनं, मम सङ्घर्षः' इत्यस्य हिन्दी-संस्करणस्य विमोचनावसरे सम्बोधयन् आसीत्।सः अकथयत् यत् २०१७ तमे वर्षे योगादित्यनाथस्य नेतृत्वे सर्वकारस्य निर्माणानन्तरं राज्यमिदं नूतनां गतिं प्राप्तवत्। मुख्यमन्त्री उत्तरप्रदेशं खर्बमितायाः (एक-ट्रिलियन्-डॉलर्) अर्थव्यवस्थायाः रूपेण परिणमयितुं सङ्कल्पं स्वीकृतवान् अस्ति, तथा च पूर्वप्रधानमन्त्रिणः अटलबिहारीवाजपेयिनः स्वप्नानुकूलं राज्यमिदम् 'उत्तमप्रदेशे' परिवर्तयितुं प्रयासानाम् अभूतपूर्वां गतिं दत्तवान्। सः विश्वासं प्राकटयत् यत् राज्ये क्रियान्वितानां विकासयोजनानां प्रभावेण समाजस्य सर्वेभ्यः वर्गेभ्यः उद्योगस्य (रोजगारस्य), शिक्षायाः, आर्थिकोन्नतेः च अवसराः प्राप्स्यन्ते।रामनाथकोविन्दः स्वस्य बाल्यकालस्य स्मृतीः संविभज्य असूचयत् यत् कानपुर-ग्रामीणजनपदस्य परौंख-नामके ग्रामे तस्य गृहम् अतीव साधारणम् आसीत्, वर्षर्तौ च छदिषः (छतात्) जलं स्रवति स्म। २०१७ तमे वर्षे राष्ट्रपतिपदे निर्वाचनानन्तरं सः तेषां कुटुम्बानां विषये विचारितवान् ये अद्यापि समुज्ज्वल-भविष्यस्य स्वप्नं पश्यन्ति। केन्द्रे मोदिसर्वकारेण उत्तरप्रदेशे च योगिसर्वकारेण प्रधानमन्त्रि-आवासयोजनान्तर्गते कृतानां प्रयासानां फलस्वरूपं निर्धनपरिवारेभ्यः न केवलं पक्कानि गृहाणि प्राप्तानि, अपि तु तेभ्यः सम्मानः सुरक्षा च प्राप्ता। पक्कगृहस्य महत्त्वं त एव अवगन्तुं शक्नुवन्ति यैः कदाचित् जलस्रावि-छदिषः अधः जीवनं यापितम्।पूर्वराष्ट्रपतिना उत्तरप्रदेशस्य युवानः राजनीति-शासन-प्रशासन-जनजीवनेषु सक्रियतया भागं ग्रहीतुम् आहूताः। सः अकथयत् यत् लोकतन्त्रे सहभागिता केवलं मतदानपर्यन्तं सीमिता न भवेत्। सुशासनाय निष्ठावन्तः, सक्षमाः, संवेदनशीलजनाः च राजनीतौ अग्रे आगच्छेयुः। सः यूनः राष्ट्रसेवायाः कृते प्रेरितवान्, तेभ्यः एषः सन्देशः च दत्तः यत् तैः कदापि पराजयः न अङ्गीकरणीयः (नैराश्यं न गन्तव्यम्)।

हिमाचलप्रदेशस्य सर्वकारीयचिकित्सालयेषु कर्मचारिणाम् अभावस्य निवारणं भविष्यति, यत्र ३१ दिसम्बर यावत् ९०% पदानि पूरयितुं लक्ष्यम्



हिमसंस्कृतवार्ताः- शिमला। राज्यसर्वकारस्य प्रवक्ता अवदत् यत् राज्ये स्वास्थ्यसेवानां अधिकं सुदृढीकरणाय चिकित्सा- शिक्षाविभागस्य अन्तर्गतं अटल इन्स्टिट्यूट ऑफ मेडिकल सुपर स्पेशलिटी, चमियाना सहितं चिकित्सामहाविद्यालयेषु सहायककर्मचारिणां उपचारिकाणां ६५० पदस्थानानि पूरितानि सन्ति। १३०० पदानां नियुक्तिप्रक्रिया प्रचलति। आदर्शस्वास्थ्यसंस्थासु सहायककर्मचारि- उपचारिकानाम् ११७ पदस्थानानि पूरितानि सन्ति। सद्यःकाले राज्यमन्त्रिमण्डलस्य सभायां स्वास्थ्यविभागे ५०० अतिरिक्तसहायककर्मचारि- उपचारिकानाम् नियुक्तेः अनुमोदनं कृतम्। सः अवदत् यत् राज्यचयन-आयोगस्य माध्यमेन चयनितानां शल्यकक्षसहायक- अभ्यर्थीनां कृते अद्य चिकित्साशिक्षाविभागे ८४ पदं स्वास्थ्यविभागे ३९ पदं च नियुक्तिपत्राणि कृतानि। तदतिरिक्तं स्वास्थ्यविभागे २१ रेडियोग्राफरपदानां अभ्यर्थीनां नियुक्तिपत्राणि अपि कृतानि। १७ औषधविक्रेता पदानाम् नियुक्तिः कृता अस्ति, अन्येषां ७४ पदानाम् नियुक्तिप्रक्रिया प्रचलति। ६६ चिकित्सा-प्रयोगशाला- प्रविधिज्ञानाम्, ८ प्रयोगशाला-सहायकानां, २० रेडियोग्राफराणां, २ नेत्ररोगविशेषज्ञानां, ७ भौतिकचिकित्सकानां, १३ शल्यक्रियाशालासहायकानां च नियुक्तिः प्रचलति। सद्यः एव राज्यमन्त्रिमण्डलस्य सभायां चिकित्साशिक्षाविभागे आदर्शस्वास्थ्यसंस्थानां कृते ३० रेडियोलॉजिस्ट, १३ नैदानिकमनोवैज्ञानिकाः, ६ परफ्यूजनिस्ट, १० रेडियोग्राफरः च पूरयितुं पदानि अनुमोदितानि। राज्यसर्वकारः स्वास्थ्यक्षेत्रे नवीनपरिकल्पनाः निरन्तरं कार्यान्वयति। चिकित्सालयाः चिकित्साशिक्षायाः च आधुनिकीकरणं क्रियते। स्वास्थ्यसंस्थासु पर्याप्तवैद्यानां, पैरामेडिकलकर्मचारिणां, तकनीकिनां च उपलब्धतां सुनिश्चित्य नियुक्तिप्रक्रिया प्रचलति। चिकित्सामहाविद्यालयेषु स्वास्थ्यसेवाः अधिकं सुदृढां कर्तुं राज्यसर्वकारेण चिकित्साशिक्षाविभागस्य स्वास्थ्यविभागस्य च अन्तः पैरामेडिकल- मन्त्रिकर्मचारिणां कार्यकर्तृणां पृथक्करणं मार्च २०२५ तमे वर्षे आरब्धम् अस्ति प्रवक्ता अवदत् यत् वर्तमानराज्यसर्वकारेण राज्यस्य अन्तः विशेषस्वास्थ्यसेवायाः उपलब्धिः सुनिश्चित्य २०२६ तमस्य वर्षस्य दिसम्बर-मासस्य ३१ दिनाङ्कपर्यन्तं सर्वेषु सर्वकारीय- चिकित्सा-महाविद्यालयेषु ९० प्रतिशतं चिकित्सा-उपचिकित्सा- आदि- सहायककर्मचारिणां परिनियोजनस्य लक्ष्यं निर्धारितम् अस्ति सः अवदत् यत् राज्यसर्वकारस्य कृते स्वास्थ्यक्षेत्रं प्राथमिकता अस्ति। आधुनिकचिकित्सायन्त्राणाम् उपकरणानां च क्रयणार्थं प्रायः ₹३००० कोटिरूप्यकाणि व्यय्यन्ते। हिमाचलप्रदेशसर्वकारः राज्ये स्वास्थ्यक्षेत्रस्य व्यापकरूपेण नवीनीकरणाय, सुदृढीकरणाय च पूर्णतया प्रतिबद्धः अस्ति। राज्यस्य जनानां कृते गृहस्य समीपे आधुनिकाः, विश्वस्तरीयाः स्वास्थ्यसेवासुविधाः प्रदातुं स्वास्थ्यसंरचनायां चिकित्साशिक्षणे च प्रमुखाः परिष्काराः क्रियन्ते।

आईआइटी-प्रशिक्षुछात्रान् वहन्ति टैक्सी- यानेज्ञज्वालाः

प्रज्वलिताः, दैवयोगेन रक्षिताः प्राणाः



हिमसंस्कृतवार्ताः- मण्डी। आईआईटी कमान्दतः मण्डीनगरं प्रति IIT प्रशिक्षुछात्रान् वहन्ति टैक्सीयाने बुधवासरे सहसा अग्निः जातः। चालकः षट् प्रशिक्षुवः च पलायनं कृत्वा स्वप्राणान् रक्षितुं समर्थाः अभवन् । सूचनां प्राप्य अग्निशामकदलं घटनास्थले आगतम्। अग्निशामकाः टैक्सीयानं जलेन शान्तं कर्तुं यतितवन्तः, परन्तु तावत्पर्यन्तं टैक्सीयानं पूर्णतया ज्वालाभिः आक्रान्तम् आसीत्। मण्डीनगरस्य पैलेस कालोनी इत्यस्य निवासी अङ्कितः स्वभ्रात्रा राहुलेन सह टैक्सी चालयति स्म। एतद् टैक्सीयानं आईआइटी-प्रबन्धनेन भाटकेन गृहीतम् इति ज्ञातम् अस्ति। बुधवासरे सायं ४:१५ वादनस्य समीपे प्रशिक्षवः कटिण्डीतः प्रायः एककिलोमीटर दूरे मण्डीनगरं प्रति गच्छन्ति स्म । मण्डी अग्निशामकस्थानकस्य अग्निशामकः प्रदीपकुमारः अवदत् यत् टैक्सी पूर्णतया ज्वालाभिः आक्रान्तम् अस्ति।

हिमाचले नूतनजनपदानां सङ्घटनाय आयोगस्य स्थापना, निवृत्तन्यायाधीशः धर्मचन्दचौधरी अध्यक्षः नियुक्तः



हिमसंस्कृतवार्ताः- शिमला।
हिमाचलप्रदेशे नूतनजनपदानां सङ्घटनसम्बद्धा महत्त्वपूर्णा सूचना समागता अस्ति। राज्यसर्वकारेण नूतनजनपदानां सङ्घटनाय आयोगः गठितः अस्ति। निवृत्तन्यायाधीशः धर्मचन्दचौधरी आयोगस्य अध्यक्षः नियुक्तः। एतदतिरिक्तम् अधिवक्ता विशाल पँवरः, निवृत्तः भारतीयवनसेवाधिकारी राजेशशर्मा आयोगस्य सदस्यौ नियुक्तौ स्तः। हिमाचलप्रदेशस्य भूमिलेखविभागस्य निदेशकः आयोगस्य सदस्यसचिवः नियुक्तः अस्ति। आयोगेन अधिसूचनायाः तिथेः षण्मासाभ्यन्तरे स्वस्य अन्तिमप्रतिवेदनं सर्वकाराय समर्पयितव्यम्। प्रतिवेदने प्रशासनिकैककानां पुनर्सङ्घटनसम्बद्धाः स्पष्टाः अनुशंसाः समाविष्टाः भविष्यन्ति। आयोगस्य प्रतिवेदनस्य आधारेण सर्वकारः अग्रिमकार्यविधिं कर्तुं विचारयितुं शक्ष्यति।प्राप्तसूचनानुसारं हिमाचलप्रदेशे प्रशासनव्यवस्थां अधिकप्रभावशालिनीं जनसुविधानुकूलां च कर्तुं सर्वकारेण महत्त्वपूर्णं पदक्षेपं स्वीकृतम् अस्ति। राज्ये जनपदानाम्, उपमण्डलानाम्, तहसीलानाम्, उपतहसीलानां, विकासखण्डानां च अन्येषां विविधप्रशासनिकैककानां पुनर्सङ्घटनाय आयोगस्य सङ्घटनं कृतम् अस्ति। अयम् आयोगः वर्तमान- प्रशासनिक- संरचनायाः समीक्षां करिष्यति तथा आवश्यकतानुसारं नवीनैककानां गठनं, विलयनं, विभाजनं, पुनर्गठनं च कर्तुं सर्वकाराय अनुशंसाः प्रदास्यति। आयोगस्य मुख्यालयः शिमलानगरे भविष्यति।हिमाचलप्रदेशस्य वर्तमानप्रशासनिक-संरचनायाः विस्तृताध्ययनस्य दायित्वम् अपि आयोगाय समर्पितम् अस्ति। अस्य अन्तर्गतं जनपदानाम्, उपमण्डलानां, तहसीलानाम्, उपतहसीलानां, विकासखण्डानां, विभिन्न-विभागानाम् अन्येषां प्रशासनिकैककानां च समीक्षा क्रियते।

रविः खरिडेहालः - बेङ्गलूरु।

"हिमालयस्य लोहमार्ग-छन्नपथः निर्माणं प्रचलति"

ऋषिकेश-कर्णप्रयाग मध्ये एषः छन्नपथः भवति । भृङ्गाभ्यः पुष्पछन्नपथाः, फलवृक्षाः च कल्पिताः सन्ति । विचारः मधुमेखला निर्मातुं भवति । फलकृषिः, मधुनिर्माणं, स्थानीयजीविकायाः च समर्थनं कुर्वन् हरित-छन्नपथस्य निर्माणं अस्य उपक्रमस्य उद्देश्यम् अस्ति । मधुभृङ्गाः-अनुकूलपुष्प-वनस्पतयः विकेन्द्रीकृत- सस्यवाटिकाः पारदर्शकरूपेण आच्छादिता छदिः भित्तियुक्ता च गृहाणि च योजनाकृताः सन्ति । आर-वी-एन-एल इत्युक्ते "रेल विकास निगम सीमित" ३७ ००० कोटिरूप्यकाणां एतां परियोजनां निष्पादयति । १०४ कि.मी.पर्यन्तं विस्तृताः १६ मुख्यसुरङ्गाः, १२ पलायनसुरङ्गाः च सन्ति । ८३% मार्गः पर्वतमार्गेण भवति । उत्खनितस्य पङ्कस्य बृहत् परिमाणं पुनः प्रयोजनं कृत्वा पर्वतयोः मध्ये अपशिष्ट-भूमिपूरणस्थलानि निर्माति । एतेषु स्थलेषु प्रायः १०,००० फलदातृवृक्षाणां योजना अस्ति।



शिक्षकनिर्वाचने समाजवादीपक्षस्य विजयाय रणनीतिः निर्मिता बाँसीनगरे एस. के. मैरेज इत्यत्र सपादलस्य उपवेशनं सम्पन्नम्

हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः।

सिद्धार्थनगरजनपदस्य बाँसीनगरे एस. के. मैरेज इत्यत्र गोरखपुर- फैजाबादखण्डस्य शिक्षकनिर्वाचनक्षेत्रात् समाजवादीपक्षस्य अधिकृतप्रत्याशिनः विजयः सुनिश्चितः कर्तुं समाजवादीपक्षस्य जनपदाध्यक्षस्य माननीयस्य लालजी यादवमहोदयस्य अध्यक्षतायां महत्त्वपूर्णा संगोष्ठी सम्पन्ना। अस्मिन् पक्षस्य अधिकृतप्रत्याशिनः विजयाय विस्तृतरणनीतिः निर्मिता। निर्वाचनस्य सफलसञ्चालनाय विभिन्नकार्यकर्तृभ्यः दायित्वानि अपि समर्पितानि। उपस्थितैः सर्वैः कार्यकर्तृभिः पक्षप्रत्याशिनः विजयाय पूर्णनिष्ठया कार्यं कर्तुं संकल्पः कृतः।कार्यक्रमस्य मुख्यातिथिः गोरखपुर- फैजाबादखण्डस्य शिक्षकनिर्वाचनक्षेत्रात् समाजवादीपक्षस्य प्रत्याशी डॉ. संजयन त्रिपाठीमहोदयः आसीत्।उपवेशने शिक्षकनिर्वाचने पक्षप्रत्याशिनः विजयाय सामूहिकप्रयत्नानां महत्त्वं प्रतिपादितम्। सर्वैः कार्यकर्तृभिः एकजुटतया निर्वाचनक्षेत्रे सक्रियतया कार्यं कृत्वा प्रत्याशिनः विजयः सुनिश्चितः कर्तुं दृढनिश्चयः व्यक्तः।

सेक्टर-१२-क्षेत्रे स्वरागिन्या प्रसिद्धगायकाय अभिनेतृ-किशोरकुमाराय सङ्गीतमयी श्रद्धाञ्जलिः समर्पिता

'मेरे नैना सावन भादो, फिर भी मेरा मन प्यासा...' 'तेरी दुनिया से होके मजबूर चला, मैं बहुत दूर बहुत दूर चला...'

हिमसंस्कृतवार्ताः- बोकारो।

चलचित्रजगतः बहुमुखप्रतिभासम्पन्नस्य कलाकारस्य किशोरकुमारस्य पुण्यतिथिमुपलक्ष्य मङ्गलवासरे सायंकाले बोकारो-नगरस्य सेक्टर- १२ क्षेत्रे 'स्वरागिनी म्यूजिकल ग्रुप' इत्यस्य तत्त्वावधाने सङ्गीतसन्ध्यायाः आयोजनं कृतम्। रमणचौधरी-रागिनीसिन्हा-अम्बष्ठयोः संयोजकत्वे आयोजितस्य कार्यक्रमस्य शुभारम्भः प्रसिद्धगायकैः अरुणपाठकः, सोमेशमिश्रः, रमणचौधरी, गायिकाभिः रञ्जूसिंहः, सुनीतागुप्ता, ऋद्धिमारिया, श्वेताप्रियदर्शिनी, मञ्जसञ्चालकेन पूर्णेन्दुकुमार-सिंहेन, वरिष्ठरङ्गकर्मिणा शम्भूझा इत्यनेन किशोरकुमारस्य चित्रे माल्यार्पणं पुष्पार्चनं च कृत्वा कृतः। अस्मिन् अवसरे प्रसिद्धगायकः अरुणपाठकः अवदत् यत् किशोरदायाः व्यक्तित्वं बहुआयामि आसीत्। सः प्रसिद्धगायकः एव न, अपि तु कुशलः अभिनेता निर्देशकश्च आसीत्। तेन गीताः गीतानि अद्यापि जनमानसेषु लोकप्रियाणि सन्ति। रमणचौधरी अवदत् यत् किशोरकुमारस्य गीतानि अद्यतनयुवपीढ्यामपि अत्यन्तं लोकप्रियाणि सन्ति। सोमेशमिश्रः उक्तवान् यत् किशोरदायाः स्वरवैशिष्ट्यं गायनक्षमता च अद्वितीया आसीत्। शम्भूझा अवदत् यत् किशोरकुमारः स्वकीयेन गायनकौशलेन अभिनयप्रतिभया च सदैव स्मरणीयः भविष्यति। पूर्णेन्दुसिंहः उक्तवान् यत् किशोरकुमारेण चलचित्रजगति स्वस्य बहुमुखप्रतिभायाः परिचयः प्रदत्तः। रञ्जूसिंहः अवदत् यत् किशोरदया लताजी- आशाजीभ्यां सह बहूनि मनोहराणि युगलगीतानि गातानि।



अवसरेऽस्मिन् कलाकाराः किशोरकुमारेण गातानां प्रसिद्धगीतानां सुमधुरगायनेन तस्मै सङ्गीतमयीं श्रद्धाञ्जलिं समर्पितवन्तः। गायकः अरुणपाठकः 'छूकर मेरे मन को किया तूने क्या इशारा...', 'मेरे नैना सावन भादो फिर भी मेरा मन प्यासा...', 'तेरे मेरे मिलन की ये रैना...', 'तेरी दुनिया से होके मजबूर चला...' इत्यादीनि गीतानि प्रस्तुतवान्। अरुणपाठकः रञ्जूसिंहश्च 'कोरा कागज था ये मन मेरा...' तथा 'देखा एक ख्वाब तो ये सिलसिले हुए...' इति युगलगीताभ्यां श्रोतॄन् मन्त्रमुग्धान् अकुरुताम्। रमणचौधरी 'मुसाफिर हूं यारों न घर है न ठिकाना...', 'दिल में आग लगाए सावन का महीना...', 'आज तू गैर सही...', 'प्यार कहते हैं जिसे...' इत्यादीनि गीतानि प्रस्तुतवान्। ततः सः रञ्जूसिंहेन सह 'मुझे नौलखा मंगाइदे रे...' इति युगलगीतं तथा सुनीतागुप्तया सह 'शायद मेरी शादी का ख्याल दिल में आया है...' इति गीतं प्रस्तुतवान्। सोमेशमिश्रः 'तुम भी चलो हम भी चलें...', 'प्यार मांगा है तुम्हीं से...' इत्यादीनि गीतानि अन्यानि च मधुरगीतानि प्रस्तुत्य किशोरकुमारं स्मृतवान्। समग्रः कार्यक्रमः मधुरसङ्गीतस्य भावपूर्णप्रस्तुतिभिश्च समृद्धः अभवत्।

अष्टमकक्षायाः छात्रा सौम्यावर्मा एकदिनस्य कृते जिलामूलभूतशिक्षाधिकारिणी अभवत्



बालिकानां सशक्तीकरणाय नेतृत्वक्षमतायाः विकासाय च प्रशंसनीयः आरम्भः

हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेय।

बालिकानां सशक्तीकरणं तासां नेतृत्वक्षमतायाः विकासश्च इत्येतयोः उद्देश्यम् आधारीकृत्य आयोजिता एका प्रशंसनीया पहलः अन्तर्गतं मदनपुरस्य पूर्वमाध्यमिक- विद्यालयस्य अष्टमकक्षायाः प्रतिभाशालिनी छात्रा सौम्यावर्मा एकदिनस्य कृते जिलामूलभूतशिक्षाधिकारिण्याः दायित्वं निर्वहन्ती प्रशासनिककार्यप्रणालीं समीपतः अवगन्तुं विभिन्नानां विभागीयकार्याणां च विषये महत्त्वपूर्णं ज्ञानं प्राप्तवती। अस्मिन् अवसरे सौम्यावर्मा जिलासमन्वयकात् ई. एम. आई. एस. अमितपाण्डेयमहोदयात् तस्य पटलस्य माध्यमेन सञ्चालितानां कार्याणां,

विभागीय- गतिविधीनां, कार्यप्रगतेः च विषये विस्तरेण ज्ञानं प्राप्तवती।तथैव सा बालिकाशिक्षायाः जिलासमन्वयकात् सुरेन्द्रश्रीवास्तवमहोदयात् मिशनशक्तिकार्यक्रमस्य समीक्षां कुर्वती बालिकानां सशक्तीकरणसम्बद्धान् विविधविषयान् अपि अवगतवती।एषा प्राथमिकता बालिकासु आत्मविश्वासस्य, नेतृत्वक्षमतायाः, निर्णयग्रहणयोग्यतायाः, प्रशासनिकावबोधस्य च विकासाय महत्त्वपूर्णं सोपानम् अस्ति। एतादृशाः अवसराः बालिकाः महत्स्वप्नानि द्रष्टुं, स्वक्षमताः ज्ञातुं, भविष्ये नेतृत्वपूर्णासु भूमिकासु दायित्वं निर्वोढुं च प्रेरयन्ति।बालिकाः केवलं भविष्यस्य आधाराः न, अपितु वर्तमानकाले अपि सशक्ताः नेतृत्वकर्त्र्यः सन्ति। अतः ताभ्यः समुचिताः अवसराः प्रदातव्याः। अवसरं प्राप्य ताः स्वप्रतिभया समाजे नवीनम् आदर्शं स्थापयितुं समर्थाः भविष्यन्ति।

सिद्धार्थनगरे मुख्यमन्त्रि- सामूहिकविवाह-योजनान्तर्गतं ४१२ युगलानां विवाहः



३०३ हिन्दूयुगलानि, ६४ बौद्धयुगलानि, ४५ मुस्लिमयुगलानि च परिणयसूत्रेण बद्धानि
नवदम्पतीभ्यः गृहस्थोपयोगिवस्तूनि प्रदत्तानि, जनप्रतिनिधिभिः सुखमयवैवाहिकजीवनाय शुभाशीर्वादाः प्रदत्ताः।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। सिद्धार्थनगरजनपदे १४ अक्तूबर दिनाङ्के मुख्यमन्त्रि- सामूहिकविवाह- योजनायाः अन्तर्गतं भव्यः सामूहिकविवाहसमारोहः आयोजितः। अस्मिन् समारोहे ४१२ युगलानां विवाहः तेषां धार्मिकपरम्परानुसारं विधिवत् सम्पन्नः। तत्र हिन्दूसमुदायस्य ३०३ युगलानि, बौद्धसमुदायस्य ६४ युगलानि, मुस्लिमसमुदायस्य ४५ युगलानि च विवाहबन्धने बद्धानि।

जिला- प्रारंभिक- शिक्षाधिकारी- कार्यालयस्य पार्श्वस्थे विशालप्राङ्गणे आयोजिते अस्मिन् समारोहे अनेकाः जनप्रतिनिधयः, प्रशासनिकाधिकारिणः, अन्ये गणमान्याः अतिथयः उपस्थिताः आसन्। नवदम्पतीभ्यः गृहस्थजीवनस्य आरम्भाय विविधाः उपयोगिवस्तूनि प्रदत्तानि। अतिथिभिः नवविवाहितयुगलेभ्यः सुखमयस्य समृद्धस्य च वैवाहिकजीवनस्य शुभकामनाः प्रदत्ताः।

दीपप्रज्वालनेन कार्यक्रमस्य शुभारम्भः

कार्यक्रमस्य शुभारम्भः डुमरियागञ्ज- लोकसभाक्षेत्रस्य सांसदेन जगदम्बिका पालमहोदयेन, बाँसीविधानसभाक्षेत्रस्य विधायकने जयप्रतापसिंहेन, कपिलवस्तुविधानसभाक्षेत्रस्य विधायकेन श्यामधनी राहिमहोदयेन, जिलाधिकारीणा शिवशरणप्पा जी. एन. महोदयेन, पुलिसाधीक्षकेण डॉ. अभिषेक महाजनमहोदयेन, मुख्यविकासाधिकारीणा बलरामसिंहमहोदयेन च दीपप्रज्वालनेन कृतः। अवसरेऽस्मिन् जनप्रतिनिधिभिः प्रशासनिकाधिकारिभिश्च नवदम्पतीनां सुखदं भविष्यं कामयमानैः तेभ्यः शुभाशीर्वादाः प्रदत्ताः।

निर्धनपरिवाराणां कृते महत्त्वपूर्णा योजना

सांसदः जगदम्बिका पालमहोदयः मुख्यमन्त्रि- सामूहिक- विवाहयोजनां निर्धनानां आवश्यकताग्रस्त- परिवाराणां च कृते महत्त्वपूर्णाम् उपकारिकां योजनाम् अवर्णयत्। तेन उक्तं यत् अस्याः योजनायाः माध्यमेन निर्धनपरिवाराणां कन्यानां विवाहसम्बन्धिनी चिन्ता न्यूनीभवति। एतया योजनया च ते स्वकन्यानां विवाहं सम्मानपूर्वकं सम्पन्नं कर्तुम् अवसरं प्राप्नुवन्ति।

नवदम्पतीभ्यः गृहस्थोपयोगिवस्तूनां वितरणम्

समारोहे नवविवाहितयुगलेभ्यः वस्त्राणि, पात्राणि, चलसञ्चिकाः (ट्रॉलीबैग), व्यजनं, शीतकयन्त्राणि, तल्पाः, उपधानानि, कम्बलानि, भोजनपात्रसमुच्चयाः, घटी, अन्यानि गृहस्थोपयोगिवस्तूनि वितरितानि। तदतिरिक्तं मिष्टान्नानि शुष्कफलानि च प्रदत्तानि।

अनेन सामूहिकविवाहकार्यक्रमेण नवदम्पतीनां नवजीवनस्य शुभारम्भाय आर्थिकसहयोगः प्रदत्तः। कार्यक्रमस्य मुख्योद्देश्यं निर्धनपरिवाराणां भारं न्यूनीकृत्य विवाहसंस्कारं सम्मानपूर्वकं सम्पन्नं कर्तुं सहयोगप्रदानम् आसीत्।

वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदरधीरजः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। काञ्चन विचित्राः वार्ताः मया श्रुताः।

कैश्चित् कृत्रिमबुद्धि- शोधकर्तृभिः धूम्रपानम् आरब्धम्। तैः चिन्तितं यत् कृत्रिमबुद्ध्या कर्करोगस्य औषधम् अन्विष्टम् भविष्यति इति। अतः तैः रोगस्य भयं त्यक्तम्।

काव्या- अहो, तैः महती मूर्खता क्रियते! आरोग्यम् एव धनम्। मया अपि अन्या वार्ता पठिता। मदुरैनगरे एकया प्रभाविकया अन्तर्जाले स्वस्य गृहसङ्केतः प्रकाशितः। ततः अपरिचितैः जनैः तस्यै बहूनि वस्तूनि प्रेषितानि। तेषां वस्तूनां मूल्यं प्राप्तिकाले दातव्यम्। तया महती समस्या अनुभूता।

नन्दिनी- हास्यास्पदम्! अन्तर्जाले सङ्केतः न दातव्यः इति तया अधुना अवगतम्। आक्स्फोर्ड-विश्वविद्यालये अपि किञ्चित् आश्चर्यं दृष्टम्।

भौतिकशास्त्रज्ञैः एकः सूक्ष्मकणः अस्पृष्ट्वा एव चुम्बकीयक्षेत्रेण अवरुद्धः। एतत् अपूर्वं कार्यं तैः सम्पादितम्।

काव्या- भौतिकशास्त्रस्य नियमाः अतीव विचित्राः खलु। पूर्वकाले अपि विचित्रता अतीव दृष्टा। अमेरिकादेशे एका पुरातनी पुत्तलिका सङ्ग्रहालये प्रदर्शिता। यदा भोजनपीठे त्रयोदश जनाः उपविष्टाः... तदा त्रयोदशसङ्ख्याभीतितः सा पुत्तलिका चतुर्दशे आसन्दे स्थापिता।

नन्दिनी- सत्यम्, अन्धविश्वासः सर्वत्र दृष्टः। वार्ता-दर्शनार्थं धन्यवादः।



डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम

"संस्कृतकथामञ्जरी" {३२} (१) ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

"अथ कामधेनुसंवादो नाम षड्विंशोपाख्यानम्"

पुनरपि राजा यावत् सिंहासनं समुपवेष्टुमुपचक्रमे, तावदन्या पुत्तलिकया प्रतिरुध्य उक्तं- भो राजन्! अस्मिन् सिंहासने स एव उपवेष्टुं योग्यः, यस्य विक्रमस्येवौदार्य्यादयो गुणाः सन्ति। तदाकर्ण्य भोजेनोक्तं- भो पुत्तलिके! कथय तस्य विक्रमस्यौदार्य्यादि- गुणवृत्तान्तम्। राज्ञैव पृष्टा सा अब्रवीत्- भो राजन्! श्रूयताम् औदार्य्य- दया- विवेक- धैर्यादिगुणैः अन्यो विक्रमसदृशो राजा भूमण्डले नास्ति। अन्यच्च तेन यदुच्यते, तदन्यथा न क्रियते, यच्चित्ते तिष्ठति, वाचा तत्तथैव वदति, यद्वचने प्रकाशयति तत्तथैव करोति, अतोऽतीव सज्जनोऽयम्। उक्तञ्च-

"यथा चित्तं तथा वाक्यं यथा वाक्य तथा क्रिया।
चित्ते वाचि क्रियायाञ्च साधूनामेकरूपता।।"

एकदा सुरनगर्य्याम् इन्द्रः सिंहासने उपविष्ट आसीत्। तस्य च सभायामष्टशीतिसहस्राणिं ऋषीणाम् आसन्। त्रयस्त्रिंशत्कोट्यः देवता उपविष्टा अभवन्। अष्टौ लोकपालाः, एकोनपञ्चाशन्मरुतः, द्वादशादित्याः, नारदः, तुम्बरुः, उर्वशी- मेनका- रम्भा- तिलोत्तमा- मिश्रकेशी- घृताची- मञ्जुघोषा- प्रियदर्शना प्रभृतिदिव्यस्त्रियश्च उपविष्टा बभुवुः। सर्वेऽपि गन्धर्वाणां गणः उपविष्टोऽभूत। तस्मिन्नवसरे तत्र नारदेन उक्तम्- अभ्रादिभूमण्डले विक्रमार्कसदृशः कीर्तिमान्, परोपकारी, महासत्त्वसम्पन्नो राजा नास्ति। तस्य तद्वचनमाकर्ण्य सर्वे देवसभास्थिताः परं विस्मयं जग्मुः। तदा सुरभि अभणत्- कोऽत्र सन्देहः? विस्मयो वा कः? उक्तञ्च-

"दाने तपसि शौर्य्ये च विज्ञाने विनये नवे।
विस्मयो न च कर्तव्यो बहुरत्ना वसुन्धरा।।"

तत् श्रुत्वा इन्द्रेण सुरभिकन्या कामधेनुः भणिता- त्वं विक्रमस्य दया- परोपकारादीन् गुणान् निर्णेतुं मर्त्यलोकं गच्छ इति। तत कामधेनुरत्यन्तदुर्बलं गोरुपं धृत्वा मर्त्यलोकं गच्छन्ती यावत् विक्रमार्को मार्गे समायाति, तावत् स्वयम् अत्यन्तदुस्तरेपङ्के निमग्ना स्वसमीपवर्त्तिना च केनचित् व्याघ्रेण सतृष्णामवलोकितेत्येवं स्वमायया आत्मानमतिविपन्नमदर्शयत्, राजानं दृष्ट्वा च कातरं शब्दं चकार। एवं तत्कातरोक्ति- श्रवणविदलितप्रायहृदये राजानि तां गां पङ्कात उत्थापयितुं प्रयत्नं कुर्व्वाणे सूर्य्योऽस्तं गतः। अथ क्रमेणान्धकारमयो रात्रिरप्यागता। सोऽपि अनाथां तां गां रक्षन् तत्रैव स्थितः। एवं निशाऽवसानमभूत्। ततः सूर्योदये जाते सा गौः तस्यं राज्ञो दयाधैर्य्यादिगुणान् निरीक्ष्य स्वयमेवोत्थिता राजानमवदत्- भो राजन्! अहं कामधेनुः, तव दयादिगुणान् परीक्षितुं स्वर्गात् समागता, स्वयमेत्य प्रत्ययञ्च दृष्टः। त्वत्सदृशो दयापरो राजा भूतले नास्ति। तव अनेन गुणेन अहं प्रसन्नाऽस्मि, वरं वृणीष्व। क्रमशः.....

बसौहली- महोत्सवः- इरावती- महा- आरत्याः सिद्ध्यै सज्जताः अन्तिमचरणे, प्राचार्यस्य डॉ. सौम्य-रञ्जन- महापात्रस्य श्रद्धालुभ्यः निमन्त्रणम्



हिमसंस्कृतवार्ता। सांस्कृतिक-आध्यात्मिक-चेतनायाः प्रतीकभूतस्य विश्वप्रसिद्धस्य 'बसौहली-महोत्सवस्य' सज्जताः अन्तिमं चरणं प्रविष्टाः सन्ति। आगामिनि अक्तूबर- मासस्य १९, २०, २१ दिनाङ्केषु आयोज्यमानस्य अस्य त्रिदिवसीयस्य महोत्सवस्य मुख्यम् आकर्षणं रावी- (इरावती) नद्याः पावनतटे आयोज्यमाना भव्या 'इरावती-महा- आरती' भविष्यति। चूड़ामणि- संस्कृत-संस्थानस्य गुरुकुलस्य वटुकैः इयम् अलौकिकी महाआरती सम्पादयिष्यते, यस्याः सज्जताः संस्थानस्य प्रबन्धसमित्याः मार्गदर्शनेन पूर्णतां गच्छन्ति। कार्यक्रमस्य विषये विस्तृतं विवरणं ददता संस्थानस्य प्राचार्येण डॉ. सौम्यरञ्जन-महापात्रेण उक्तं यत् विद्यार्थिभिः वैदिकमन्त्रोच्चारणपूर्वकम् आरत्याः पूर्वाभ्यासः अन्तिमं रूपं नीयते।

अस्मिन् अवसरे डॉ. महापात्रमहोदयः सम्पूर्णस्य जम्मूकश्मीरप्रदेशस्य धर्मप्रेमिणः श्रद्धालून् निवेदितवान् यत् ते सपरिवाराः बसौहली-क्षेत्रं प्राप्य अस्मिन् महोत्सवे सोत्साहं भागं गृह्णन्तु। देशस्य विभिन्नेभ्यः राज्येभ्यः आगच्छतां कलाकाराणां, शिल्पकाराणां, वणिजां च मनोबलं वर्धयन्तु। सन्ध्यासमये रावीतटे महाआरत्याः दर्शनं कृत्वा मातुः इरावत्याः आशीर्वादं प्राप्नुवन्तु तथा च बसौहली-क्षेत्रस्य विश्वप्रसिद्धायाः रामलीलायाः दर्शनम् अपि कुर्वन्तु इति तेन आह्वानं कृतम्।

संस्कृतभाषा न केवलं काचित् भाषा, अपि तु भारतीयसंस्कृतेः, सभ्यतायाः, चेतनायाश्च जीवन्तः प्राणाः सन्ति। यत्र वटुकानां मुखेभ्यः निःसृताः मन्त्राः वातावरणं पवित्रं कुर्वन्ति, तत्रैव वेदानाम् उपनिषदां च ज्ञानं मानवजीवनस्य सम्यग्दिशं निर्धारयति। चूड़ामणि- संस्कृत- संस्थानम् ईदृशानामेव शाश्वतानां मूल्यानां वाहकं वर्तते। अत्र अध्ययनं कुर्वन्तः वटुकाः न केवलं शास्त्रेषु अपितु कर्मकाण्डे, वेदानां संस्कृतस्य च रक्षणेन विश्वकल्याणस्य भावनाम् अपि वर्धयन्ति। यदा नद्याः तटे संस्कृतमन्त्राणां गुञ्जनं भवति, तदा प्रकृतिरपि दिव्यतां प्राप्नोति। एषः महोत्सवः न केवलं जनसम्मेलनम्, अपि तु अस्माकं प्राचीन- गुरुकुलपरम्परायाः, कलायाः, आध्यात्मिकतायाश्च सजीवः सङ्गमः अस्ति।

रावी-नद्याः शान्ततटे वटुकैः क्रियमाणः सस्वरः वेदपाठः, शतशः प्रज्वलितानां दीपानाम् अलौकिकी प्रभा च बसौहली-महोत्सवम् एकाम् अदृष्टपूर्वाम् आध्यात्मिकानुभूतिं प्रदास्यति।

विद्यापीठपञ्चाङ्गस्य वैक्रमाब्दस्य २०८४ व्रतपर्वाणां शास्त्रसम्मतः निर्णयः



श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृत-विश्वविद्यालये त्रिदिवसीया राष्ट्रियपञ्चाङ्ग-कार्यशाला सम्पन्ना; कुलपतिना कुलसचिवेन च प्रदत्ताः शुभकामनाः

हिमसंस्कृतवार्ता नवदेहली।

श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविश्व-विद्यालयस्य, नवदेहली इत्यस्य ज्योतिषविभागस्य धर्मशास्त्रविभागस्य च विदुषां सहभागितापूर्णेन शास्त्रीयविमर्शेन विद्यापीठपञ्चाङ्गस्य वैक्रमाब्दस्य २०८४ व्रतपर्वोत्सवानां निर्णयः कृतः। एतदर्थं विश्वविद्यालयस्य कपिलसभागारे २०२६ तमस्य वर्षस्य सितम्बरमासस्य २३ तः २५ दिनाङ्कपर्यन्तं त्रिदिवसीयायाः राष्ट्रियपञ्चाङ्गकार्यशालायाः आयोजनम् अभवत्। कार्यशालायां ज्योतिष-धर्मशास्त्रयोः विद्वांसः शास्त्रीयसिद्धान्तानां, पारम्परिकगणनापद्धतीनां तथा च धर्मशास्त्रीयमान्यतानाम् आधारेण व्रतपर्वाणां विधिवत् निर्णयम् अकुर्वन्। भारतीयज्ञानपरम्परायां पञ्चाङ्गं केवलं तिथिनिर्धारणस्य साधनं न, अपि तु धार्मिक-सांस्कृतिक-आध्यात्मिकजीवनस्य समयसंरचनायाः महत्त्वपूर्णः आधारः अस्ति। व्रतपर्वाणां निर्णये ज्योतिषीयगणनायाः धर्मशास्त्रीयमान्यतानां च समन्वयस्य विशिष्टा भूमिका वर्तते। अस्यां दृष्टौ आयोजिता एषा राष्ट्रियकार्यशाला शास्त्रसम्मत-पञ्चाङ्गनिर्माणस्य समृद्धां परम्परां सुदृढीकर्तुं विदुषां मध्ये ज्ञानविमर्शस्य विस्ताराय च महत्त्वपूर्णं योगदानम् अयच्छत्। कार्यशालायां बाह्यविद्वद्रूपेण कामेश्वरसिंह-दरभङ्गा-संस्कृतविश्वविद्यालयस्य, दरभङ्गा इत्यस्य भूतपूर्वकुलपतिः प्रो. रामचन्द्रझा, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविश्वविद्या-लयस्यभूतपूर्वज्योतिषविभागाध्यक्षः प्रो. प्रेम-कुमारशर्मा, तथा च केन्द्रीयसंस्कृत-विश्वविद्यालयस्य, नवदेहली इत्यस्य ज्योतिषविद्याशाखायाः सेवानिवृत्ताचार्यः प्रो. वासुदेवशर्मा च विशेषरूपेण उपस्थिताः आसन्।

विश्वविद्यालयस्य ज्योतिषविभागस्य वरिष्ठाचार्यः प्रो. विनोदकुमारशर्मा, विभागाध्यक्षः प्रो. दिवाकरदत्तशर्मा, विभागीयाचार्यः कुलानुशासकः च प्रो. परमानन्दभारद्वाजः, प्रो. सुशीलकुमारः, प्रो. फणीन्द्रकुमारचौधरी, प्रो. रश्मिचतुर्वेदी, डॉ. रत्नलालः, डॉ. मनोरमाकुमारी, डॉ. खेमराजरेग्मी, डॉ. बृजमोहनशास्त्री तथा च डॉ. होमेशदत्तपाराशरः कार्यशालायां सहभागिताम् अकुर्वन्। धर्मशास्त्रविभागस्य आचार्यः प्रो. यशवीरसिंहः सहायकप्राध्यापकः डॉ. नितिनकुमारः च अपि उपस्थितौ आस्ताम्। विद्वांसः स्वविषयगतज्ञानस्य शास्त्रीयविशेषज्ञतायाः च आधारेण वैक्रमाब्दस्य २०८४ व्रतपर्वाणां निर्णये योगदानं दत्तवन्तः।

कार्यशालायाः समापनानावसरे विश्वविद्यालयस्य कुलपतिना प्रो. मुरलीमनोहरपाठकेन कार्यशालायां गृहीतानां निर्णयानां समीक्षा कृता तथा च विद्यापीठपञ्चाङ्गस्य प्रकाशनाय शुभकामनाः प्रदत्ताः। सः इमम् आयोजनं भारतीयज्योतिषस्य धर्मशास्त्रस्य च समृद्धपरम्परायाः संरक्षण-संवर्धनयोः दिशि महत्त्वपूर्णशैक्षणिकप्रयासरूपेण प्रोत्साहितवान्।

विश्वविद्यालयस्य कुलसचिवेन प्रो. पवनकुमारशर्मणा अपि कार्यशालायाः सफलायोजनाय सम्बद्धविभागानां विदुषे आयोजनेन सम्बद्धेभ्यः सर्वेभ्यः सदस्येभ्यः च वर्धापनानि प्रदत्तानि। सः पञ्चाङ्गनिर्माणसदृशे महत्त्वपूर्णे शास्त्रीयकार्ये विदुषां सामूहिकसहभागितायाः, अनुशासनस्य, शैक्षणिकसमर्पणस्य च प्रशंसां कुर्वन् विद्यापीठपञ्चाङ्गस्य प्रकाशनाय शुभाशयान् प्राकटयत्।

कुलपतेः प्रो. मुरलीमनोहरपाठकस्य शुभकामनाभिः कुलसचिवस्य प्रो. पवनकुमारशर्मणः वर्धापनसन्देशेन च कार्यशालासम्बद्धानां विदुषाम् आयोजकानां च उत्साहवर्धनम् अभवत्। इदम् आयोजनं भारतीयज्ञानपरम्परायाः प्रामाणिकताम् अक्षुण्णां रक्षता शास्त्रसम्मतपञ्चाङ्गनिर्माणं प्रति विश्वविद्यालयस्य शैक्षणिकाध्यवसायस्य परिचायकम् अभवत्।

श्रीमद्देवीभागवतमहापुराणे योगसाधनायाः स्वरूपं समकालीनयुवानां जीवनस्य च प्रासङ्गिकता



- डॉ. रमेशचन्द्रपाण्डेयः,
शङ्कराचार्यः धर्माधिकारी ज्योतिषाचार्यः
उत्तराखण्डविद्वत्सभायाः संरक्षकश्च

श्रीमद्देवीभागवतमहापुराणस्य सप्तमस्कन्धस्य पञ्चत्रिंशत्तमे अध्याये भगवती हिमालयाय योगस्य आत्मज्ञानस्य यमस्य नियमस्य आसनस्य प्राणायामस्य प्रत्याहारस्य धारणायाः ध्यानस्य समाधेः कुण्डलिनीसाधनायाश्च उपदेशं ददति। अस्मिन्नध्याये वर्णितायाः योगविधेः प्रयोजनं केवलं आध्यात्मिकसिद्धिप्राप्तिः न अपि तु मानवजीवनस्य संयमितम् अनुशासितं सन्तुलितं च निर्माणमपि अस्ति। वर्तमानकाले यूनां पुरतः शिक्षायाः वृत्तेश्च प्रतिस्पर्धायाः सामाजिकापेक्षाणां डिजिटल-माध्यमानां च कारणेन अनेकाः समस्याः समुत्पद्यन्ते। एतादृशे परिवेशे देवीभागवतस्य अयं उपदेशः विशेषमहत्त्वं धारयति। अस्य माध्यमेन व्यक्तिः स्वाचरणस्य परिष्कारं कर्तुं मनसः स्थैर्यं रक्षितुं जीवनस्य प्रति सकारात्मकदृष्टिकोणं विकसितुं च प्रेरणां प्राप्नोति।

भगवती योगस्य स्वरूपं स्पष्टीकुर्वन्ती कथयति

न योगो नभसः पृष्ठे न भूमौ न रसातले।
ऐक्यं जीवात्मनोरेव योगमाहुर्मनीषिणः॥ २॥

एतन्नाम योगः न आकाशे अस्ति न पृथिव्यां न च पाताले। मनीषिणः जीवात्मनः परमात्मना सह ऐक्यं योगमिति कथयन्ति। अनेन कथनेन स्पष्टं भवति यत् योगस्य सम्बन्धः केवलं बाह्यक्रियाभिः न अपि तु आत्मबोधेन आन्तरिकचैतन्येन च अस्ति। अस्मिन्नेव अध्याये काम- क्रोध- लोभ- मोह- दममात्सर्याणि योगमार्गे बाधामुत्पादयन्तः षड्दोषाः इति वर्णितानि सन्ति। एते दोषाः अद्यतने जीवने अपि विविधरूपेण दृश्यन्ते। अन्येषां सफलतां दृष्ट्वा ईर्ष्यां करणं शीघ्रसफलताप्राप्त्यर्थम् अनुचितमार्गस्य अनुसरणम् असफलतायां क्रोधः प्रशंसया अहङ्कारस्य उत्पत्तिश्च व्यक्तेः निर्णयक्षमताम् प्रभावितं कुर्वन्ति। एतासां प्रवृत्तीनां नियन्त्रणस्य अर्थः इच्छानां सम्पूर्णतया उन्मूलनं न अपि तु तासां विवेकस्य अधीनतया स्थापनम् अस्ति। विद्यार्थिना प्रतिस्पर्धा कर्तव्या एव किन्तु अन्यान् अवमान्य न। लक्ष्यप्राप्त्यर्थं परिश्रमः करणीयः किन्तु अनैतिकसाधनानाम् आश्रयः न ग्रहीतव्यः। असफलतायाः प्राप्तौ निराशः भवितुं स्थाने स्वकीयाः न्यूनताः ज्ञात्वा पुनः प्रयासः करणीयः।

भगवती योगस्य अष्टाङ्गानि वर्णयन्ती कथयति

यमं नियममासनप्राणायामौ ततः परम्।
प्रत्याहारं धारणाख्यं ध्यानं सार्धं समाधिना।
अष्टाङ्गान्याहुरेतानि योगिनां योगसाधने॥ ४५॥

यमः नियमः आसनं प्राणायामः प्रत्याहारः धारणा ध्यानं समाधिश्च योगस्य अष्ट अङ्गानि सन्ति। एतेषु यमस्य नियमस्य च विशेषमहत्त्वम् अस्ति यतः एतौ व्यक्तेः आचरणाय दैनिकव्यवहाराय च दिशं प्रदर्शयतः। भगवती दश यमान् निर्दिशति

अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम्।
क्षमा धृतिर्मिताहारः शौचं चैति यमा दश॥ ६॥

अहिंसा सत्यम् अस्तेयं ब्रह्मचर्यं दया आर्जवं क्षमा धृतिः मिताहारः शौचं च दश यमाः सन्ति। वर्तमानकाले अहिंसायाः एतन्नाम केवलं शारीरिकहिंसायाः परिहारः न अपि तु अन्येषाम् अपमानं न करणम् सामाजिकमाध्यमेषु कटुवचनात्मक- टिप्पणीनां परिहारः प्रत्येकस्य व्यक्तेः प्रतिष्ठायाः सम्मानं च अस्ति। सत्यपालनं परीक्षायां सेवायां शोधकार्ये व्यावसायिकजीवने च सत्यनिष्ठारूपेण प्रकटते। अस्तेयस्य तात्पर्यं केवलम् अन्यस्य धनस्य अपहरणं न करणम् इति न अपि तु अन्यस्य विचारस्य श्रमस्य बौद्धिकसम्पत्तेश्च अनुचितोपयोगस्य परिहारः अपि अस्ति। ब्रह्मचर्यं आत्मसंयमस्य स्वकीयशक्तेः सार्थककार्येषु विनियोगस्य च प्रेरणां ददाति। दया आर्जवं च व्यक्तिं संवेदनशीलं कुरुतः। क्षमा धृतिश्च कठिनपरिस्थितिषु धैर्येण अग्रे गन्तुं शक्तिं प्रयच्छतः। मिताहारः सन्तुलितभोजनस्य शौचं च शारीरिकमानसिकस्वच्छतायाः प्रेरणां ददाति।

यमैः सह भगवती दश नियमान् अपि वर्णयति

तपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम्।
सिद्धान्तश्रवणं चैव ह्रीर्मतिर्जपोहुतम्॥ ७॥

तपः सन्तोषः आस्तिक्यं दानं देवपूजनं सिद्धान्तश्रवणं ह्रीः मतिः जपः हवनं च दश नियमाः सन्ति। एतेषां व्यावहारिकमहत्त्वम् अद्यापि वर्तते। तपसः अर्थः स्वयम् आत्मानं कष्टे स्थापयितुम् इति न अपितु कठिनकार्येषु निरन्तरं समर्पितभावेन प्रवृत्तिः अस्ति। सन्तोषस्य अर्थः प्रगतेः इच्छायाः परित्यागः न अपितु उपलब्धीनां प्रति कृतज्ञतां धारयित्वा अग्रे प्रवर्तनम् अस्ति। दानं केवलं धनप्रदानपर्यन्तं सीमितं नास्ति। स्वकीयेन समयेन ज्ञानेन कौशलेन च अन्येषाम् उपकारः करणम् अपि दानस्य स्वरूपम् अस्ति। अध्ययनम् आत्मपरीक्षणं नियमितसाधना च व्यक्तिं स्वलक्ष्यस्य प्रति जागरूकं कुर्वन्ति। एतेषां सिद्धान्तानाम् अनुसरणं कुर्वन् युवा सफलतया सह नैतिकतायाः व्यक्तिगतलब्ध्या सह सामाजिकदायित्वस्य च महत्त्वं ज्ञातुं शक्नोति।

अस्मिन्नध्याये पद्मासनं स्वस्तिकासनं भद्रासनं वज्रासनं वीरासनं चेति पञ्च आसनानि वर्णितानि सन्ति। आसनानि साधकाय स्थैर्यं प्रयच्छन्ति तथा शरीरं साधनानुकूलं कुर्वन्ति। वर्तमानकाले विद्यार्थिनः कार्यालयेषु कार्यं कुर्वन्तश्च बहवः युवानः दीर्घकालं यावत् एकस्मिन्नेव स्थाने उपविशन्ति। तेषां कृते समुचितशारीरिकस्थितिः नियमितव्यायामः पर्याप्तविश्रामश्च आवश्यकाः सन्ति। केवलम् आसनाभ्यासः पर्याप्तः नास्ति। शरीरस्य आवश्यकतानां ज्ञानं दिनचर्यायाः सुव्यवस्थापनं च समानरूपेण महत्त्वपूर्णम् अस्ति।

भगवती प्राणायामस्य वर्णनं कुर्वन्ती पूरकस्य कुम्भकस्य रेचकस्य च विधिं कथयति। ग्रन्थे श्वासग्रहणस्य श्वासरोधस्य श्वासत्यागस्य च कृते क्रमेण षोडशचतुःषष्टिद्वात्रिंशन्मात्राणां विधानम् उल्लिखितम् अस्ति। एतत् पारम्परिकयोगविधेः वर्णनम् अस्ति। योग्यप्रशिक्षकस्य मार्गदर्शनं विना दीर्घकालं यावत् श्वासरोधस्य अभ्यासः न करणीयः। दैनिकजीवने सहजश्वासस्य अवधानम् कार्यस्य मध्ये लघुविश्रामग्रहणम् तनावस्य समये शान्ततया उपवेशनं च उपयोगिनः अभ्यासाः भवितुम् अर्हन्ति।

योगस्य अन्यानि अङ्गानि अपि दैनिकजीवने महत्त्वपूर्णां भूमिकां निर्वहन्ति। प्रत्याहारः इन्द्रियाणि अनावश्यकविषयेभ्यः निवर्तयितुं प्रेरयति। धारणा कस्मिंश्चित् एकस्मिन् विषये मनसः स्थिरीकरणस्य अभ्यासः अस्ति। ध्यानं च एकाग्रतायाः निरन्तरधारणस्य प्रक्रिया अस्ति। अद्यत्वे चलदूरभाषाः सामाजिकसञ्जालानि निरन्तरं प्राप्यमाणाः सूचनाश्च युवानां ध्यानं पुनः पुनः विचालयन्ति। यदि विद्यार्थी अध्ययनसमये चलदूरभाषं दूरं स्थापयेत् निश्चितकालपर्यन्तम् एकस्मिन्नेव विषये ध्यानं केन्द्रितं कुर्यात् मध्ये मध्ये च नियोजितविश्रामं गृह्णीयात् तर्हि तस्य कार्यक्षमतायां सुधारः भवितुं शक्नोति। शोधकर्तॄणां कृते नियमिताध्ययनं स्रोतसां सत्यापनं निष्कर्षेषु निष्पक्षता च एकाग्रतायाः विवेकस्य च आवश्यकानि अङ्गानि सन्ति। योगस्य अर्थः संसारात् पलायनं न अपि तु संसारे एव स्थित्वा स्वकीयविचाराणां व्यवहारस्य निर्णयानां च संयमनम् अस्ति। क्रमशः... अग्रिमे पृष्ठे





सप्तपुरीपरिचयः

स्कन्दपुराणस्य काशीखण्डः भारतवर्षस्य आध्यात्मिक- सांस्कृतिक- महत्त्वपूर्णानां सप्तमुक्तिक्षेत्राणां (सप्तपुरीणां) सविस्तरं वर्णनं करोति। एताः सप्तपुर्यः मोक्षदायिन्यः, पापनाशिन्यश्च कथ्यन्ते। १३५ संख्यकेषु श्लोकेषु एतेषां क्षेत्राणां महिमा, स्वरूपं, माहात्म्यञ्च प्रतिपादितमस्ति। अयोध्या, मथुरा, माया, काशी, काञ्ची, अवन्तिका, पुरी द्वारावतीति स्कन्दपुराणे सप्तपुरीणां नामानि निर्दिष्टानि सन्ति। एताः सप्तपुर्यः विष्णोः शिवस्य च शक्त्या भूषिताः मोक्षस्य साक्षात् द्वाराणि सन्ति। अत्र क्रमेण सर्वेषां क्षेत्राणां विशेषविवरणमधः प्रस्तूयते।

१. सप्तपुरीणां परिचयः माहात्म्यञ्च

स्कन्दपुराणे महर्षयः सूतमहर्षिं पृच्छन्ति यत् पृथिव्यां कानि क्षेत्राणि प्राणिनः मुक्तिदायकानि सन्ति। तदा निम्नोक्तप्रकारेण सप्तपुरीणां नामानि निर्दिश्यन्ते, तद्यथा-

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः।।

एताः सप्तपुर्यः साक्षात् मोक्षस्य द्वाराणि सन्ति। यः कोऽपि मनुष्यः एषु क्षेत्रेषु निवसति, म्रियेत वा, सः जन्ममृत्युचक्रात् मुक्तो भवति।

२. क्रमेण सप्तपुरीणां वैशिष्ट्यवर्णनम्

अयोध्यापुरी-

इयम् अयोध्यापुरी भगवतः श्रीरामस्य जन्मभूमिरस्ति। सरयूजलैः पवित्रिता इयं पुरी धर्मस्य, नीतेः, भक्त्याश्च प्रतीकभूतास्ति। अस्याः पुर्याः दर्शनमात्रेण जनाः पापमुक्ताः भवन्ति। इयं पुरी भगवता सूर्यवंशस्य मुकुटमणिना मर्यादापुरुषोत्तमेन श्रीरामेण अधिष्ठितास्ति। सरयूनद्याः पवित्रजलेन समन्ततः सेविता इयं नगरी भक्तानां कृते अमोघं पुण्यं ददाति। अत्र जन्म लब्ध्वा वा मरणं प्राप्य जनाः भवसागरात् तरन्ति। सरयूजलसंप्लुता, धर्मराज्यस्य प्रतीकभूता इयं पुरी ब्रह्महत्यादिपापानामपि नाशिनी अस्ति।

मथुरापुरी-

भगवान् श्रीकृष्णस्य जन्मस्थली इयं पुरी भक्तिरसस्य केन्द्रमस्ति। यमुनानद्याः तटे स्थिता इयं नगरी भक्तजनानाम् आनन्ददायिनी, ज्ञानमुक्तिप्रदा च वर्तते।यमुनानद्याः तीरे स्थिता, चतुर्व्यूहस्य भगवतः श्रीकृष्णस्य जन्मस्थली इयं पुरी भक्तिज्ञानवैराग्याणां संगमस्थली वर्तते। अत्र गोवर्धनपर्वतः, यमुना, वनक्षेत्राणि च कृष्णलीलया पावितानि सन्ति। अस्याः दर्शनेन प्रेमभक्तिः, मुक्तिश्च सुलभतया प्राप्यते। मथुरायां परिक्रमा कर्तव्या, यतोहि सा सकलपापहरा भवति।

मायापुरी (हरिद्वारम्)-

गङ्गानद्याः द्वारे स्थिता इयं पुरी मोक्षस्य आदिद्वारमिति मन्यते। अत्र स्नानेन, भगवदाराधनेन च मनुष्यः पुण्यभाग् भवति। गङ्गानद्याः सम्यक् पर्वतीयक्षेत्रात् समतलक्षेत्रे प्रवेशस्थलं मायापुरी (हरिद्वारम्) इत्युच्यते। इयं शिवस्य च विष्णोश्च उभयोः प्रियतमा अस्ति। अत्र 'हर की पैड़ी' (ब्रह्मकुण्डम्) अस्ति । अत्र स्नानेन मनुष्यः जन्मजन्मान्तरस्य पापेभ्यः मुक्तो भवति। कुम्भमेलायाः पवित्रतमं क्षेत्रमिदं वरीवर्ति।

काशीपुरी (वाराणसी)-

सप्तपुरीषु काशी प्रमुखा, साक्षात् भगवतः शिवस्य क्षेत्रमस्ति। एषा प्रलयकालेऽपि न नश्यति (त्रिशूलारोपिता अस्ति)। मुक्तिप्रदानाम् एषा राजधानी इव वर्तते। सप्तपुरीषु काशी साक्षात् महादेवाधिष्ठिता प्रमुखा, अविमुक्तक्षेत्रञ्च वर्तते। प्रलयकालेऽपि इयं न नश्यति, यतः इयं शिवस्य त्रिशूलस्योपरि स्थिता इति मान्यता वरीवर्ति। अत्र मरणकाले भगवान् शिवः स्वयं तारकमन्त्रं कर्णयोः उपदिशति, येन जीवः मुक्तिं प्राप्नोति। मणिकर्णिकाघाटः अस्याः प्राणकेन्द्रमस्ति।

काञ्चीपुरी-

दक्षिणभारतस्य प्रमुखा, ऐतिहासिक- धार्मिक- महत्त्वपूर्णा नगरी इयं शक्तिपीठेषु, ज्ञानक्षेत्रेषु च अग्रगण्येषु अन्यतमा अस्ति। दक्षिणभारतस्य तमिलनाडुराज्ये स्थिता इयं पुरी काञ्ची (विष्णुकाञ्ची शिवकाञ्ची च) नाम्ना प्रख्याता अस्ति। इयं नगरी वेदान्तस्य, कलायाः, साधनायाश्च केन्द्रमस्ति। कामाक्षीमाता अत्र जगतः कल्याणार्थं विराजते। अत्रत्यानि मन्दिराणि वास्तुशिल्पस्य अद्भुतोदाहरणानि सन्ति।

अवन्तिकापुरी (उज्जयिनी)-

शिप्रानदीतटे स्थिता, महाकालस्य नगरी इयं विद्यायाः, धर्मस्य, ज्योतिषस्य च प्रमुखा स्थली अस्ति। अत्र महाकालस्य दर्शनेन अकालमृत्युभयं न भवति। शिप्रानदीतटे स्थिता इयं नगरी महर्षिभिः ज्योतिषशास्त्रस्य केन्द्ररूपेण प्राचीनकालात् पूजिता अस्ति। अत्र द्वादशज्योतिर्लिङ्गेषु अन्यतमः महाकालेश्वरः विराजते। महाकालस्य दर्शनात् अकालमृत्युर्न भवति,भक्ताश्च मोक्षं प्राप्नुवन्ति।

द्वारावती (द्वारका)-

पश्चिमोदधिवेलायां स्थिता, भगवतः श्रीकृष्णस्य राजधानी इयं सागरतटे शोभमाना समुद्रस्य वैभवयुक्ता मोक्षपुरी अस्ति। पश्चिमे समुद्रतटे भगवतः श्रीकृष्णस्य स्वर्णमयी राजधानीरूपेण निर्मिता इयं पुरी मोक्षपुरीषु अन्तिमा गणिता। गोमतीनद्याः तीरे स्थिता इयं पुरी चक्रतीर्थस्य प्रभावेण पापानि नाशयति। अस्याः दर्शनेन भौतिकसुखानामुपरि आध्यात्मिकशान्तिः प्राप्यते।

३. उपसंहारः (मोक्षस्य साधनम्)

स्कन्दपुराणस्य काशीखण्डश्लोकेषु स्पष्टं कृतं यत् एताः सप्तपुर्यः केवलं भौगोलिकस्थानानि न सन्ति, अपितु आत्मिकशुद्धेः, साक्षात् ईश्वरप्राप्तेश्च माध्यमाः सन्ति। एताः सप्तपुर्यः भारतीयसंस्कृतेः प्राणस्वरूपाः सन्ति, याः मनुष्याणां लौकिकपारलौकिककल्याणाय सदा प्रदीप्ताः तिष्ठन्ति। यः कोऽपि श्रद्धालुः एतेषां क्षेत्राणां माहात्म्यं शृणोति, तेषु च आचारेण निवसति, सः परमपदं प्राप्नोतीति ॐ शम् ॐ।

लेखकः -
आचार्यः डॉ. रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृत-विश्वविद्यालयः, तिरुपतिः

केन्द्रीयसंस्कृत-विश्वविद्यालयस्य कुलसचिवपदे प्रो. आर्. जी. मुरली-कृष्णेन कार्यभारः स्वीकृतः

हिमसंस्कृतवार्ता। केन्द्रीयसंस्कृतविश्वविद्यालयस्य, नवदेहली इत्यस्य (स्थायि-)कुलसचिवपदे प्रो. आर्. जी. मुरलीकृष्णेन सोमवासरे कार्यभारः स्वीकृतः। अस्मिन् अवसरे विश्वविद्यालयस्य कुलपतिना प्रो. श्रीनिवास-वरखेडीमहोदयेन तस्मै वर्धापनानि शुभकामनाः च प्रदाय विश्वासः प्रकटितः यत् तस्य अनुभवेन, प्रशासनिकदक्षतया, समर्पणेन च विश्वविद्यालयस्य प्रशासनिकव्यवस्था अधिका सुदृढा भविष्यति तथा च समन्वयस्य, पारदर्शितायाः, कार्यकुशलतायाः च नवीना गतिः प्राप्स्यते।विश्वविद्यालयस्य विभिन्नानाम् अनुभागानाम् अधिकारिभिः कर्मचारिभिः च अपि कुलसचिवस्य प्रो. आर्. जी. मुरलीकृष्णस्य स्वागतम् अभिनन्दनं च कृतं तथा च विश्वविद्यालयस्य प्रगतौ पूर्णसहयोगस्य आश्वासनं प्रदत्तम्।केन्द्रीयसंस्कृतविश्वविद्यालयपरिवारस्य पक्षतः प्रो. आर्. जी. मुरलीकृष्णमहोदयाय नूतनदायित्वार्थं हार्दिकाः शुभाशयाः तथा च सफलकार्यकालस्य मङ्गलाशासनानि।





अध्यायस्य उत्तरार्धे मूलाधारात् सहस्रारपर्यन्तं चक्राणां कुण्डलिन्याः शक्तेश्च वर्णनं कृतम् अस्ति। शक्तेः ऊर्ध्वगतिः शिवशक्त्योः ऐक्यस्य ध्यानं च पारम्परिकयोगसाधनायाः आध्यात्मिकसङ्कल्पनाः सन्ति। एताः आधुनिकशरीरविज्ञानेन प्रमाणितानां शारीरिकसंरचनानां समानरूपेण प्रस्तुतुं न उचितम्। एतासाम् आध्यात्मिकतात्पर्यं चेतनायाः विकासस्य अन्तर्मुखतायाः आत्मानुशासनस्य च साधनारूपेण अवगन्तुं शक्यते। ग्रन्थे साधनायाः नियमिताभ्यासस्य मन्त्रस्य योगस्य च परस्परसम्बन्धे अपि बलं प्रदत्तम् अस्ति।

न योगेन विना मन्त्रो न मन्त्रेण विना हि सः।
द्वयोरभ्यासयोगो हि ब्रह्मसंसिद्धिकारणम्॥

अस्य तात्पर्यम् अस्ति यत् योगमन्त्राभ्यासौ परस्परसम्बद्धसाधनारूपेण स्वीक्रियेते तथा उभयोः अभ्यासः आध्यात्मिकसिद्धेः साधनं मन्यते। जटिलसाधनाः केवलं पुस्तकीयज्ञानस्य अथवा सामाजिकमाध्यमेषु उपलब्धानाम् अपूर्णसूचनानाम् आधारेण आरम्भणीयाः न सन्ति। विशेषतः कुण्डलिनीजागरणस्य दीर्घकुम्भकस्य च प्रक्रियासु योग्यगुरोः मार्गदर्शनम् आवश्यकम् अस्ति।

एवं श्रीमद्देवीभागवतमहापुराणस्य सप्तमस्कन्धस्य पञ्चत्रिंशत्तमे अध्याये वर्णिता योगविधिः अद्यतनयुवानाम् आत्मसंयमस्य नियमितायाः एकाग्रतायाः विवेकपूर्णजीवनस्य च प्रेरणां ददाति। एतदर्थम् असाधारणानुभवस्य प्रतीक्षा कर्तुं आवश्यकता नास्ति। प्रतिदिनं स्वकार्याणां समीक्षणं क्रोधावस्थायां प्रतिक्रियां दातुं पूर्वं विचारः समयस्य सदुपयोगः अनावश्यकतुलनायाः परिहारः स्वलक्ष्यस्य दिशि निरन्तरप्रयत्नश्च साधनायाः व्यावहारिकरूपाणि सन्ति। योगस्य वास्तविकं महत्त्वं तदैव प्रकटते यदा तस्य प्रभावः व्यक्तेः व्यवहारे निर्णयेषु सम्बन्धेषु उत्तरदायित्वेषु च दृश्यते। ज्ञानं तदैव सार्थकं भवति यदा तत् आचरणे अवतरति। एकाग्रता तदैव उपयोगिनी भवति यदा तस्याः प्रयोगः सम्यग्दिशि क्रियते। साधना तदैव जीवनोपयोगिनी भवति यदा सा मनुष्यं अधिकं विवेकशीलं संवेदनशीलं उत्तरदायिनं च करोति।

अखिलभारतीयप्राच्यविद्यापरिषद् - सम्मेलनोन्मेषाः प्राच्यमनीषामन्थनम्- ICO-तः AIOC-पर्यन्तं धारावाहिकम् .३



प्रथमं भारतीयं प्राच्यविद्यासम्मेलनम्- ५ तः ७ नवम्बर, १९१९ पर्यन्तम्

- प्रथमस्य भारतीयप्राच्यविद्यासम्मेलनस्य आयोजनं तदानीं तेनैव नाम्ना प्रसिद्धस्य भाण्डारकर-प्राच्यविद्या- अनुसन्धान- संस्थानस्य (Bhandarkar Oriental Research Institute, BORI), पुणे इत्यनेन, ५ तः ७ नवम्बर्, १९१९ पर्यन्तं कृतम्।

- एतत् सम्मेलनं भारते वैज्ञानिकप्राच्यविद्यायाः (Scientific Orientology) आरम्भस्य प्रतीकम् अभवत्। तस्मिन् समये यावत् अस्याः विद्यायाः क्षेत्रं मुख्यतया यूरोपीय-अमेरिकीय-प्राच्यविदुषाम् एव विशेषाधिकारक्षेत्रम् इति मन्यते स्म।

- प्रख्यातः भारतविद्, वयोवृद्धः विद्वान् सर् डॉ. आर. जी. भाण्डारकरः अस्य ऐतिहासिकस्य प्रथमाधिवेशनस्य अध्यक्षत्वेन निर्वाचितः।

प्रथम- भारतीय- प्राच्यविद्या- सम्मेलनस्य प्रथमाध्यक्षस्य सर डॉ. आर. जी. भाण्डारकरस्य अध्यक्षीयभाषणस्य अंशः

"परम्परागतपद्धत्या अध्ययनं कुर्वन्तः प्राचीनशैल्याः पण्डिताः सन्ति, ये संस्कृतविद्यायाः विविधासु शाखासु, यथा व्याकरणे न्यायशास्त्रे च, प्रामाणिकानां संस्कृतग्रन्थानाम् अध्ययने स्वजीवनस्य बहूनि वर्षाणि व्यतीतवन्तः। तेषाम् अध्ययनं विशिष्टशाखासु सीमितत्वात् निःसन्देहं गभीरं प्रामाणिकं च अस्ति, किन्तु तस्मिन् ऐतिहासिकस्य तुलनात्मकस्य आलोचनात्मकस्य च दृष्टिकोणस्य अभावः अस्ति।

अपरपक्षे, एतादृशाः विद्वांसः अपि सन्ति, ये ऐतिहासिकानां तुलनात्मकानां आलोचनात्मकानां च पद्धतीनां प्रयोगं कुर्वन्तः देशस्य साहित्यस्य, विभिन्नेषु प्रदेशेषु विकीर्णानाम् अभिलेखानां तथा पुरातात्त्विकावशेषाणां च अध्ययनं कुर्वन्ति स्म।

आलोचनात्मकविदुषा स्वकार्यं न्यायालयस्य न्यायाधीशस्य कार्यमिव मन्येत। किन्तु तत्रापि मानवीयदुर्बलताः प्रभावं कुर्वन्ति, येन अनेकवारम् प्रार्थनायाः आवश्यकता भवति। परिणामतः एकस्य न्यायाधीशस्य निर्णयः अन्यस्य न्यायाधीशस्य निर्णयात् भिन्नः भवितुम् अर्हति; तथैव एकस्य आलोचनात्मकविदुषः मतम् अन्यस्य विदुषः मतात् भिन्नं भवितुम् अर्हति।"
(कार्यविधिविवरणम्- पृष्ठम् १७)

"अस्माकं देशे आलोचनात्मकविद्वत्तायाः निरन्तरं विकासः भवति इति दृष्ट्वा मह्यं प्रसन्नता जायते। अधुनैव अनेकानाम् उत्कृष्टग्रन्थानां प्रकाशनं जातम्, विद्वत्तापूर्णव्याख्यानानि च प्रस्तुतानि।

अहं स्वजीवनस्य सक्रियवर्षाणाम् उपसंहारं कुर्वन् एतेन दृढविश्वासेन सह करोमि यत् अस्माकं मध्ये प्रामाणिकायाः सुदृढायाश्च आलोचनात्मक-विद्वत्तायाः विकासः जातः अस्ति, सा च विद्वत्ता विविधप्रकाराणाम् आलोचनानाम् आक्षेपाणां च सम्मुखीभूय स्वप्रतिष्ठां संरक्षिष्यति। अद्य आरभ्यमाणे अस्मिन् अधिवेशने बहुसङ्ख्याकानि शोधपत्राणि प्रस्तुतानि भविष्यन्ति, तेषु बहूनि निश्चयेन महत्त्वपूर्णानि भविष्यन्ति इति दृष्ट्वा अपि महती प्रसन्नता जायते। अतः सर्वथा अस्माकं समीपे स्वयम् आत्मानं सम्मेलनं च अभिनन्दितुं पर्याप्तानि कारणानि सन्ति।

मम विश्वासः अस्ति यत् एतत् सम्मेलनम् अस्माकम् अध्ययनस्य अनुसन्धानस्य च प्रगतौ महत्त्वपूर्णं मीलस्तम्भम् (Landmark) सिद्धं भविष्यति।"

परिश्रमस्य महत्त्वम् (वरदराजस्य कथा)

एकस्मिन् गुरुकुले वरदराजः नाम एकः छात्रः विद्याध्ययनं करोति स्म। सः पठने अतीव मन्दमतिः आसीत्। यत्किमपि गुरुः पाठयति स्म, तत् सः विस्मरति स्म। तस्य सहपाठिनः तस्य उपहासं कुर्वन्ति स्म, शिक्षकाः च तस्मिन् खिन्नताम् अनुभवन्ति स्म। अनेकेषां प्रयत्नानाम् अनन्तरम् अपि यदा सः किमपि अधिगन्तुं न अशक्नोत्, तदा गुरुः तस्मै अवदत्—"वत्स वरदराज! तव भाग्येषु विद्या नास्ति। अतः त्वं गृहं गत्वा कृषिं व्यापारं वा कुरु।" गुरोः आज्ञां शिरसि धारयित्वा सः अश्रुपूर्णनेत्रैः गुरुकुलात् प्रस्थितवान्।

मार्गे सः पिपासितः अभवत्। सः एकं कूपम् अपश्यत्। तत्र काश्चन महिलाः कुम्भेन कूपस्य जलेन पूरयन्ति स्म। वरदराजः तत्र गत्वा जलम् अपिबत्। जलपानानन्तरं तस्य दृष्टिः कूपस्य शिलायाः उपरि अपतत्। सः अपश्यत् यत् कोमलायाः रज्ज्वाः निरन्तरघर्षणेन दृढायां शिलायामपि गभीराः लेखाः (चिह्नानि) निर्मिताः आसन्। एतत् दृष्ट्वा सः अचिन्तयत्— "यदि एका कोमला रज्जुः निरन्तरघर्षणेन दृढां शिलां खण्डयितुं चिह्नं वा कर्तुं शक्नोति, तर्हि निरन्तराभ्यासेन मम बुद्धिः किमर्थं तीक्ष्णा न भवितुम् अर्हति?" अयम् आत्मबोधः तस्य जीवनस्य दृष्टिकोणम् अवावर्तयत्। सः झटिति गुरुकुलं प्रति न्यवर्तत। गुरवे सर्वं वृत्तान्तं निवेद्य सः पुनः अध्ययनाय अवसरं प्रार्थितवान्। गुरुः अपि तस्मै अवसरम् अयच्छत्। ततः परं वरदराजः दिवानिशं निरन्तरं कठोरपरिश्रमेण सह अभ्यासं प्रारभत। तस्य दृढनिश्चयस्य सततताभ्यासस्य च फलस्वरूपं सः मन्दमतिः बालकः कालान्तरे संस्कृतस्य महान् पण्डितः जातः। स एव विद्वान् व्याकरणस्य प्रसिद्धान् ग्रन्थान् 'लघुसिद्धान्तकौमुदीम्' 'मध्यसिद्धान्तकौमुदीं' च अरचयत्।